मुञ्चेद्वा तं रिपुर्जातु नत्वीर्ष्या सर्वनाशिनी ॥५॥
परस्मै यच्छते पुंसे य ईर्ष्यति नराधमः ।
भृशं दुःखायते तस्य कुटुम्बं कशिपोः[1] कृते ॥६॥
विजहाति स्वयं लक्ष्मीरीर्ष्यादूषितचेतसम् ।
अर्पयते च तं स्वस्याः पूर्वजायै[2] दुराशयम् ॥७॥
अतिदुःखकरी नूनं दानवीव दरिद्रता ।
इयमीर्ष्या च तद्दूती नरकद्वारदर्शिनी ॥८॥
ईर्ष्यावतां समृद्धत्वं दानिनाञ्च दरिद्रता ।
विवेकिनां मनस्येते समाने विस्मयावहे ॥९॥
ईर्ष्यया क्वापि नो कश्चित् पुष्पितः फलितोऽथवा ।
तथैवोदारचेतास्तु ताभ्यां क्वापि न वञ्चितः ॥१०॥

---

१. अन्नवस्त्रयोः, २. दरिद्रतायै ।

परिच्छेदः १९

निर्लोभिता

सन्मार्गं यः परित्यज्य परवित्ताभिलाषुकः ।
खलत्वं वर्द्धते तस्य परिवारश्च नश्यति ॥१॥

जुगुप्सा यस्य पापेभ्यो लोभं नैव करोति सः ।
प्रवृत्तिस्तस्य भद्रस्य कुकर्मणि न जायते ॥२॥

स्थिरसौख्याय यस्यास्ति स्पृहा तस्य सुमेधसः ।
लोभो नास्त्यल्पभोगानां पापकर्मविधायिनः ॥३॥

इन्द्रियाणि वशे यस्य चित्ते चातिविशालता ।
स्वोपयोगीति बुद्ध्या स नान्यवस्तु जिघृक्षति ॥४॥

किं तया क्रियते मत्या लोभे या क्रमते सदा ।
बोधेनैवञ्च किं तेन यद्यघाय समुद्यतः ॥५॥

सत्पथं ये सदा यान्ति सुकीर्तेश्चानुरागिणः ।
तेऽपि नष्टा भविष्यन्ति यदि लोभात् कुचक्रिणः ॥६॥

तृष्णया सञ्चितं वित्तं मा गृध्य हितवाञ्छया ।
एवंभूतं धनं भोगे दुःखैस्तीक्ष्णतरं भवेत् ॥७॥

लक्ष्मीर्भवेन्न मे न्यूना यद्येवं काङ्क्षसे ध्रुवम् ।
मा भूस्त्वं ग्रस्तुमुद्युक्तो वैभवं प्रतिवेशिनः ॥८॥

सुनीतिं वेत्ति यः प्राज्ञः परस्वाद् विमुखो भवन् ।
तद्गृहं ज्ञातमाहात्म्या लक्ष्मीरन्विष्य गच्छति ॥९॥

अदूरदर्शिनस्तृष्णा केवला नाशकारिणी ।
निष्कामस्य महत्त्वन्तु सर्वेषां विजयि ध्रुवम् ॥१०॥

परिच्छेदः ११

पैशुन्यपरिहारः

शुभं न रोचते यस्मै कुकृत्येषु रतश्च यः ।
सोऽपीदं मोदते श्रुत्वा यदसौ नास्ति सूचकः ॥१॥

शुभादशुभसंसक्तो नूनं निन्द्यस्ततोऽधिकः ।
पुरः प्रियम्वदः किन्तु पृष्ठे निन्दापरायणः ॥२॥

अलीकनिन्दितालापिजीवितान् मरणं वरम् ।
एवं कृते न नश्यन्ति पुण्यकार्याणि देहिनः ॥३॥

अवाच्यं यदि केनापि प्रत्यक्षे गदितं त्वयि ।
तस्य पृष्ठे तथापि त्वं मा भूर्निन्दापरायणः ॥४॥

मुखेन भाषतां वह्नीं शुभोक्तिं पिशुनो वरम् ।
सूचयत्येव तज्जिह्वा निम्नत्वं किन्तु चेतसः ॥५॥

त्वया यदि परे निन्द्याः स्युस्त्वां तेऽपि रुषान्विताः ।
दर्शयित्वा महादोषान् निन्दिष्यन्ति तवाहिताः ॥६॥

मैत्रीरसं न जानाति न चापि मधुरं वचः ।
स एव भेदमाधत्ते मित्रयोरेककण्ठयोः ॥७॥

पुरस्तादेव सर्वेषां मित्रं निन्दन्ति ये नराः ।
तैः शत्रवः कथं निन्द्या न स्युरिति विचार्यताम् ॥८॥

निन्दाकर्तुः पदाघातं सहते स्वोरसि[1] क्षमा[2] ।
तद्भारायैव सा धर्मं वीक्षते किं मुहुर्मुहुः ॥९॥

अन्यदीयमिवात्मीयमपि दोषं प्रपश्यता ।
कः समः खलु मुक्तोऽयं दोषवर्गेण सर्वदा ॥१०॥

---

१. वक्षःस्थले । २. पृथ्वी ।

परिच्छेदः २०

व्यर्थभाषणम्

अर्थशून्यं वचो यस्य श्रुत्वोद्वेगः प्रजायते ।
तत्सम्पर्काज्जुगुप्सन्ते लोके सर्वेऽपि मानवाः ॥१॥
क्लेशदानं स्वमित्रेभ्यो वरमस्तु कथञ्चन ।
गोष्ठ्यां किन्तु वृथालापो न श्लाघ्यो निम्नताकरः ॥२॥
निस्सारं दम्भपूर्णञ्च व्याख्यानं यः प्रभाषते ।
नन्वाख्याति स्वयं लोके स मन्दः[1] स्वामयोग्यताम् ॥३॥
बुधवृन्दे प्रलापेन कोऽपि लाभो न जायते ।
विद्यमानो वरांशोऽपि तत्सम्बन्धाद् विलीयते ॥४॥
योग्योऽप्ययोग्यवद् भाति व्यर्थालापपरायणः ।
सम्मानं गौरवञ्चास्य द्वयमेव विनश्यति ॥५॥
रुचिरेवास्ति यस्याहो मोघार्थवचसां व्यये ।
तं मानवं न जानीहि ह्यपेक्ष्यं चापि कच्चरम् ॥६॥
उचितं बुध चेद् भाति कुर्याः कर्कशभाषणम् ।
परं नैव वृथालापं यतोऽस्माद्वै तदुत्तमम् ॥७॥
येषां हि निरतं चित्तं तत्त्वज्ञानगवेषणे ।
विकथां ते न कुर्वन्ति क्षणमात्रं महर्षयः ॥८॥
येषां तु महती दृष्टिर्ये चैवं दीर्घदर्शिनः ।
विस्मृत्यापि न कुर्वन्ति वृथोक्तीस्ते महाधियः ॥९॥
वाचस्ता एव वक्तव्या याः श्लाघ्याः सभ्यमानवैः ।
वर्जनीयास्ततो भिन्ना अवाच्या या वृथोक्तयः ॥१०॥

---

१. मूर्खाः ।

परिच्छेदः २१

पापभीतिः

यन्मौर्ख्यं निखले लोके पापनाम्ना निगद्यते ।
ततोऽभीताः खलाः किन्तु सन्तस्तस्माच्च दूरगाः ॥१॥
'द्रोहात्संजायते द्रोह' इति सत्यं सुभाषितम् ।
दूरादेव ततस्त्याज्यो द्रोहाग्निर्वैरवर्द्धकः ॥२॥
कथयन्ति बुधा एवं यद्धीः सैवेह शस्यते ।
यया बुद्धिमता नित्यं हानिर्हेया द्विषामपि ॥३॥
विस्मृत्यापि नरो धीमान् परनाशं न चिन्तयेत् ।
यतस्तस्य विनाशाय न्यायो युक्तिं सदेक्षते ॥४॥
'निर्धनोऽस्मीति' बुद्ध्यापि न कर्तव्यं हि किल्बिषम् ।
दुरिताद् वर्द्धते यस्माद् दारिद्र्यमधिकाधिकम् ॥५॥
यदीच्छसि विपत्तिभ्यस्त्राणं सततमात्मनः ।
न कर्तव्या त्वया हानिः परेषां दुःखदायिनी ॥६॥
अन्यारिभ्यस्तु संरक्षा कदाचित् संभवत्यहो ।
परं पापाद् विनिर्मुक्तिर्नाशात्पूर्वा न जातुचित् ॥७॥
न जहाति नरं छाया यथा सा पृष्ठवर्तिनी ।
तथैव पापकर्माणि नाशोदर्काणि देहिनाम् ॥८॥
न करोति नरः पापं यस्यात्मा वै ध्रुवं प्रियः ।
स एव कुरुते पापं यस्यात्मा ध्रुवमप्रियः ॥९॥
विपदो विहतास्तस्य पूर्णरीत्या च रक्षितः ।
विधातुं पापकर्माणि यः सन्मार्गं न मुञ्चति ॥१०॥

परिच्छेदः २२

परोपकारः

नोपकारपराः सन्तः प्रतिदानजिघृक्षया ।
समृद्धः किमसौ लोको मेघाय प्रतियच्छति ॥१॥

महान्तो बहुभिर्यत्नैरर्जयन्ति स्वपौरुषात् ।
यद्द्रव्यं खलु तत्सर्वं परेषामेव कार्यकृत् ॥२॥

यः कश्चिदुपकारो हि हार्दिकः क्रियते बुधैः ।
न किञ्चिद्वस्तु तत्तुल्यं भूतले वा सुरालये ॥३॥

योग्यायोग्यविचारो हि नूनं यस्य स जीवति ।
तयोर्विवेकहीनश्च जीवन्नपि मृतायते ॥४॥

पश्य तं सलिलापूर्णं कासारं[1] हृद्यदर्शनम् ।
एवं तस्यापि गेहे श्रीर्यस्यान्तः प्रेमसंस्थितिः ॥५॥

उदाराणामिदं सर्वं वैभवं समुपार्जितम् ।
ग्राममध्ये समुत्पन्नतरुवैभवसन्निभम् ॥६॥

तेन वृक्षेण संकाशा[2] उत्तमस्य विभूतयः ।
सर्वाङ्गं यस्य भैषज्यं सदा च फलशालिनः ॥७॥

दुःखं दैवाद् यदि प्राप्तो योग्यायोग्यपरीक्षकः ।
न मुञ्चति तथाप्येष उपकारं दयाकरः ॥८॥

सुकृती रिक्तमात्मानं तदानीं मन्यते ध्रुवम् ।
आशाभंगान्निवर्तन्ते यदा वै याचका जनाः ॥९॥

उपकारो विनाशेन सहितोऽपि प्रशस्यते ।
विक्रीयापि निजात्मानं भव्योत्तम विधेहि तम् ॥१०॥

---

१. सरोवरम् । २. तुल्याः ।

परिच्छेदः २३

दानम्

दीनाय दुःखपात्राय यद्दानं तत्प्रशस्यते ।
अन्यत् सर्वन्तु विज्ञेयमुद्धारसदृशं पुनः ॥१॥

दानादाने[1] हि न श्रेयः स्वर्गोऽपि प्राप्यते यदि ।
दानञ्चं परमो धर्मः स्वर्गद्वारेऽपि मुद्रिते ॥२॥

प्रशंसार्हाः सतां मान्या ननु सर्वेऽपि दानिनः ।
परं तेषु कुलीनः स यः पूर्व न निषेधति ॥३॥

तावन्न मोदते दानी यावन्नासौ विलोकते ।
सन्तोषजनितं हर्षमर्थिनो मुखमण्डले ॥४॥

विजयेषु समस्तेषु श्रेष्ठः स्वात्मजयो मतः ।
ततोऽपि विजयः श्रेष्ठः परेषां क्षुत्प्रशामनम् ॥५॥

आर्तक्षुधाविनाशाय नियमोऽयं शुभावहः ।
कर्तव्यो धनिभिर्नित्यमालये वित्तसंग्रहः ॥६॥

इतरानपि संभोज्य यो भुङ्क्ते दययान्वितः ।
नैव स्पृशति तं जातु क्षुधारोगो भयङ्करः ॥७॥

सञ्चिनोति विनाशाय संकीर्णहृदयो धनम् ।
ज्ञायते तेन न ज्ञातो दानस्य मधुरो रसः ॥८॥

एकाकी कृपणो भुङ्क्ते यदन्नं प्रीतिसंयुतः ।
अनार्यजुष्टमस्वर्ग्यं भिक्षान्नात् तद्घृणास्पदम् ॥९॥

मृत्युरेव हि तद्वस्तु यत्सर्वाधिकमप्रियम् ।
दानशक्तेरसद्भावे चित्रमेषोऽपि रोचते ॥१०॥

---

१. दानग्रहणे ।

परिच्छेदः २२

परोपकारः

नोपकारपराः सन्तः प्रतिदानजिघृक्षया ।
समृद्धः किमसौ लोको मेघाय प्रतियच्छति ॥१॥

महान्तो बहुभिर्यत्नैरर्जयन्ति स्वपौरुषात् ।
यद्द्रव्यं खलु तत्सर्वं परेषामेव कार्यकृत् ॥२॥

यः कश्चिदुपकारो हि हार्दिकः क्रियते बुधैः ।
न किञ्चिद्वस्तु तत्तुल्यं भूतले वा सुरालये ॥३॥

योग्यायोग्यविचारो हि नूनं यस्य स जीवति ।
तयोर्विवेकहीनश्च जीवन्नपि मृतायते ॥४॥

पश्य तं सलिलापूर्णं कासारं[1] हृद्यदर्शनम् ।
एवं तस्यापि गेहे श्रीर्यस्यान्तः प्रेमसंस्थितिः ॥५॥

उदाराणामिदं सर्वं वैभवं समुपार्जितम् ।
ग्राममध्ये समुत्पन्नतरुवैभवसन्निभम् ॥६॥

तेन वृक्षेण संकाशा[2] उत्तमस्य विभूतयः ।
सर्वाङ्गं यस्य भैषज्यं सदा च फलशालिनः ॥७॥

दुःखं दैवाद् यदि प्राप्तो योग्यायोग्यपरीक्षकः ।
न मुञ्चति तथाप्येष उपकारं दयाकरः ॥८॥

सुकृती रिक्तमात्मानं तदानीं मन्यते ध्रुवम् ।
आशाभंगान्निवर्तन्ते यदा वै याचका जनाः ॥९॥

उपकारो विनाशेन सहितोऽपि प्रशस्यते ।
विक्रीयापि निजात्मानं भव्योत्तम विधेहि तम् ॥१०॥

---

१. सरोवरम् । २. तुल्याः ।

परिच्छेदः २३

दानम्

दीनाय दुःखपात्राय यद्दानं तत्प्रशस्यते ।
अन्यत् सर्वन्तु विज्ञेयमुद्धारसदृशं पुनः ॥१॥

दानादाने[1] हि न श्रेयः स्वर्गोऽपि प्राप्यते यदि ।
दानञ्च परमो धर्मः स्वर्गद्वारेऽपि मुद्रिते ॥२॥

प्रशंसार्हाः सतां मान्या ननु सर्वेऽपि दानिनः ।
परं तेषु कुलीनः स यः पूर्वं न निषेधति ॥३॥

तावन्न मोदते दानी यावन्नासौ विलोकते ।
सन्तोषजनितं हर्षमर्थिनो मुखमण्डले ॥४॥

विजयेषु समस्तेषु श्रेष्ठः स्वात्मजयो मतः ।
ततोऽपि विजयः श्रेष्ठः परेषां क्षुत्प्रशामनम् ॥५॥

आर्तक्षुधाविनाशाय नियमोऽयं शुभावहः ।
कर्तव्यो धनिभिर्नित्यमालये वित्तसंग्रहः ॥६॥

इतरानपि संभोज्य यो भुङ्क्ते दययान्वितः ।
नैव स्पृशति तं जातु क्षुधारोगो भयङ्करः ॥७॥

सञ्चिनोति विनाशाय संकीर्णहृदयो धनम् ।
ज्ञायते तेन न ज्ञातो दानस्य मधुरो रसः ॥८॥

एकाकी कृपणो भुङ्क्ते यदन्नं प्रीतिसंयुतः ।
अनार्यजुष्टमस्वर्ग्यं भिक्षान्नात् तद्घृणास्पदम् ॥९॥

मृत्युरेव हि तद्वस्तु यत्सर्वाधिकमप्रियम् ।
दानशक्तेरसद्भावे चित्रमेषोऽपि रोचते ॥१०॥

---

१. दानग्रहणे ।

परिच्छेदः २४

कीर्तिः

दानं विश्राण्य दीनेभ्यः प्रार्जयेत् कीर्तिमुज्ज्वलाम् ।
कीर्तितुल्यो यतो लाभो नरस्यान्यो न विद्यते ॥१॥

प्रशंसकमुखे तेषां वर्तते नामकीर्तनम् ।
यैः सदा दीयते दानं दीनेभ्यो दययान्वितैः ॥२॥

सर्वे भावा[1] विनश्यन्ति भुवनत्रयवर्तिनः ।
अतुला केवला कीर्तिर्नरस्याहो न नश्यति ॥३॥

दिगन्तव्यापिनी येन स्थायिनी कीर्तिरर्जिता ।
सम्मानयन्ति तं देवा ऋषेरपि महत्तरम् ॥४॥

विनाशः कीर्तिविस्फायी मृत्युश्च कीर्तिवर्द्धनः ।
मध्येमार्गं समायाति महतामेव तद्द्वयम् ॥५॥

नरत्वं खलु चेल्लब्धं भवितव्यं यशस्विना ।
नियोगेन त्वया मर्त्य मा भवेस्त्वं नरोऽथवा ॥६॥

न च क्रुध्यत्यहो स्वस्मै स्वयं दोषहतो नरः ।
परं वैरायते साकं निन्दकैः स जडाशयः ॥७॥

प्रतिष्ठाधारका नैव नूनं सन्ति नरास्तु ते ।
येषां नैव स्मृतिर्लोके कीर्तिरूपेण विश्रुता ॥८॥

अपकीर्तिमतां भारैराक्रान्तं पश्य मण्डलम् ।
समृद्धमपि तत्पूर्वं क्षयं याति शनैः शनैः ॥९॥

निष्कलङ्कं सदा यस्य जीवनं तस्य जीवनम् ।
कलङ्कैर्नष्टकीर्तिश्च नूनं मृतक एव सः ॥१०॥

---

१. पदार्थाः ।

परिच्छेदः २५

दया

महतां हि धनं चित्तं करुणारससंभृतम् ।
अन्यद् द्रव्यं यतो लोके हीनवर्गेऽपि दृश्यते ॥१॥

यथाक्रमं समीक्ष्यैव दयां चित्तेन पालयेत् ।
सर्वे धर्मा हि भाषन्ते दया मोक्षस्य साधनम् ॥२॥

असूर्या नाम ये लोका अन्धेन तमसावृताः ।
ताँस्ते प्रेत्य न गच्छन्ति येषां चित्ते दयालुता ॥३॥

अंहसां न फलं तेषां भुङ्क्ते सर्वदयारतः ।
येषां स्मरणमात्रेण नूनमात्मा प्रकम्पते ॥४॥

दयालुः पुरुषो नैव जायते क्लेशभाजनम् ।
साक्षिणी तत्र वातानां वलयैर्वेष्टिता मही ॥५॥

हन्त येन दयाधर्मस्त्यक्तः पापान्धचेतसा ।
विस्मृतं तेन भुक्त्वापि धर्मत्यजनदुष्फलम् ॥६॥

यथा वैभवहीनाय नायं लोकः सुखाकरः ।
न तथा परलोकोऽपि कारुण्यक्षीणवृत्तये ॥७॥

ऐहिकार्थपरिक्षीणः कदाचिद् धनिको भवेत् ।
परं भूतदयारिक्तो नामुत्र सुदिनोदयः ॥८॥

सुलभं नो यथा सत्यं कषायवशवर्तिनः ।
न प्रशस्तं तथा कार्यं सुकरं निष्ठुरात्मना ॥९॥

दुर्वलं वाधितुं क्रूर यदोत्साहेन चेष्टसे ।
तत्पदे स्वं तदा मत्वा चिन्तयस्व निजस्थितिम् ॥१०॥

परिच्छेदः २६

निरामिषजीवनम्

अद्यते येन मांसं हि निजमांसविवृद्धये ।
नैव संभाव्यते नूनं करुणा तस्य मानसे ॥१॥

यथा धनं न तत्पार्श्वे व्यर्थं यो व्ययते नरः ।
मांसाशिनस्तथा चित्ते दयास्तित्वं न दृश्यते ॥२॥

मांसमास्वाद्यते येन निर्दयेन दुरात्मना ।
न श्रेयसि मनस्तस्य लुण्ठाकस्येव शस्त्रिणः ॥३॥

असंशयं महत् क्रौर्यं जीवानां खलु हिंसनम् ।
परं पापस्य घोरत्वं यन्मांसं भुज्यते जनैः ॥४॥

नियमेन मनुष्यस्य मांसत्यागे सुजीवनम् ।
अन्यथा नरकद्वारं न निर्गन्तुमनावृतम् ॥५॥

यदि नैव भवेल्लोके मांसास्वादस्य कामना ।
तर्हि नैव भवेल्लोके मांसस्य खलु विक्रयः ॥६॥

परस्यापि विजानीयात् स्वस्येव निधने व्यथाम् ।
सकृदेव नरो भूयो न कुर्याज्जीवहिंसनम् ॥७॥

मिथ्यात्वत्यजनाद् यस्य हृदयं न्यायसंगतम् ।
नासौ शवबुभुक्षुः स्यात् प्राणैः कण्ठगतैरपि ॥८॥

हिंसायाः पिशिताच्चैव घृणा यस्यास्ति मानसे ।
कोटियज्ञफलं नित्यं लभ्यते तेन साधुना ॥९॥

आमिषाज्जीवघाताच्च विरतिर्यस्य धीमतः ।
पाणी संयोज्य सम्मानं कुरुते तस्य विष्टपम् ॥१०॥

परिच्छेदः २७

तपः

सर्वेषामेव जीवानां हिंसाया विरतिस्तथा ।
शान्त्या हि सर्वदुखानां सहनं तप इष्यते ॥१॥
तपो नूनं महत्तेजस्तेजस्विन्येव शोभते ।
निस्तेजसि तपः किन्तु निष्फलं जायते सदा ॥२॥
ऋषीणां परिचर्यार्थं केचिदावश्यका जनाः ।
इतीव न तपस्यन्ति किमन्ये धर्मवत्सलाः ॥३॥
रिपूणां निग्रहं कर्तुं सुहृदाश्चाप्यनुग्रहम् ।
यदीच्छा तर्हि तप्यस्व तपस्तद्द्वयसाधनम् ॥४॥
सर्वेषामेव कामानां सुसिद्धौ साधनं तपः ।
अतएव तपस्यार्थं यतन्ते सर्वमानवाः ॥५॥
ये कुर्वन्ति तपो भक्त्या श्रेयः कुर्वन्ति तेऽञ्जसा ।
अन्ये तु लालसाबद्धा आत्मनो हानिकारकाः ॥६॥
यथा भवति तीक्ष्णाग्निस्तथैवोज्ज्वलकाञ्चनम् ।
तपस्येवं यथाकष्टं मनःशुद्धिस्तथैव हि ॥७॥
प्रभुत्वं वर्तते यस्य स्वस्यात्मन्येव वस्तुनि ।
सम्पूजन्ति तं सर्वे निष्कामं पुरुषोत्तमम् ॥८॥
शक्तिसिद्धीउभेयस्य संप्राप्ते तपसोबलात् ।
मृत्योरपि जये तस्य साफल्यं दृश्यते स्फुटम् ॥९॥
अतृप्ताः सन्त्यसंख्याता अभिलाषावशंवदाः ।
अधिका हि तपोहीना विरलाश्च तपस्विनः ॥१०॥

परिच्छेदः २९

धूर्तता

प्रतारणमयीं वृत्तिं वीक्ष्य तस्यैव मायिनः ।
भौतिकाङ्गानि देहान्तस्[1]तूष्णीं भूत्वा हसन्ति तम् ॥१॥
कोऽर्थः प्रभाववत्यापि नरस्य मुखमुद्रया ।
यदि सैव विजानाति स्वचित्तं शाठ्यदूषितम् ॥२॥
तपस्विवेशमाधाय कातर्यं येन सेव्यते ।
सिंहचर्मपरिच्छन्नस्तृणभोजी स रासभः ॥३॥
धर्मेणाच्छादितस्तिष्ठन् स्वैराचारी हि पातकी ।
गुल्मेनान्तर्हितो गृह्णन् विष्किरानिव[2] नाफलः[3] ॥४॥
शुचिंमन्यः कुधीर्दम्भी मायया धर्मसेवकः ।
देहान्ते विलपत्येष हा हा नैव शुभं कृतम् ॥५॥
बहिस्त्यजति मायावी किल्बिषं नैव चेतसा ।
तथाप्याडम्बरो भूयान् दृश्यते निष्ठुरात्मनः ॥६॥
कृष्णतुण्डी यथा गुञ्जा बहिरेव मनोहरा ।
सुन्दरोऽपि तथा धूर्तो दूषणैर्दूषिताशयः ॥७॥
एवं हि बहवो लोका मनो येषां न पावनम् ।
परं तीर्थकृतस्नाना भ्रमन्ति ज्ञानिसन्निभाः ॥८॥
दर्शने सरलो बाणः किञ्चिद्वक्रश्च तुम्बुरुः ।
नराकृतिमतो हित्वा पश्य तत्कार्यपद्धतिम् ॥९॥
लोकनिन्द्यानि कार्याणि येन त्यक्तानि धीमता ।
किं जटाधारणैस्तस्य मुण्डनैर्वा महात्मनः ॥१०॥

---

१. देहमध्ये, २. पक्षिणः, ३. व्याधः ।

परिच्छेदः २९

निष्कपटव्यवहारः

घृणितं यदि नो लोके निजात्मानं दिदृक्षसि ।
स्वस्यात्मानं ततो नित्यं कपटाद्रक्ष यत्नतः ॥१॥

सर्वं वित्तं हरिष्यामि मायया प्रतिवेशिनः ।
एवं हार्दिकसंकल्पः पापाय परिकल्पते ॥२॥

कपटप्रभवं द्रव्यं वरं वर्द्धिष्णु भासताम् ।
अन्ते नाशः परं तस्य नियतोऽस्तीति निश्चयः ॥३॥

अपहारपिपासेयं समृद्धेरप्यनेहसि ।
अनन्तसंख्यकं दुःखं प्रत्येव नयति ध्रुवम् ॥४॥

परस्वं गृध्नुदृष्ट्या यो हर्तुं कालं प्रतीक्षते ।
दयास्थानं न तच्चित्ते प्रेमवार्ता च दूरगा ॥५॥

नापैति गृध्नुता यस्य लुण्ठित्वाप्यन्यसम्पदम् ।
वस्तुमूल्यं न तद्दृष्टौ सुपथश्च न याति सः ॥६॥

संसारासारतां ज्ञात्वा लब्धबोधः पवित्रदृक् ।
पार्श्वस्थवञ्चनादोषं कुरुते नैव धन्यधीः ॥७॥

आर्याणां राजते चित्ते निसर्गादृजुता यथा ।
मायित्वस्य निवासस्तु चौराणां हृदये तथा ॥८॥

तस्मिन् कारुण्यमायाति यत्रान्या नास्ति कैतवात् ।
वार्ता विमुच्य सन्मार्गं विनाशं स प्रयास्यति ॥९॥

निजदेहेऽपि स्वामित्वं वञ्चकानां विनश्यति ।
दायादाः किन्तु निर्बाधाः स्वर्गभूमेरमायिनः ॥१०॥

परिच्छेदः ३०

सत्यभाषणम्

यस्मान्न जायते पीडा कस्यापि प्राणधारिणः ।
तदेव वचनं सत्यं भाषितं मुनिपुङ्गवैः ॥१॥

संकटाकीर्णजीवानामुद्धारकरणेच्छया ।
कथिता साधुभिर्जातु मृषोक्तिरमृषैव सा ॥२॥

मृषात्वं यस्य विज्ञातं मनसा यदि धीमता ।
तद्वचो न प्रयोक्तव्यमनुतापोऽन्यथा भवेत् ॥३॥

सत्यव्रतेन यस्यास्ति पवित्रं मानसं सदा ।
प्रभुत्वं वर्तते तस्य सर्वेषामेव मानसे ॥४॥

सत्ये शाश्वतकल्याणे निमग्नं यस्य मानसम् ।
ऋषिभ्यः स महान् नूनं दानिभ्यश्च वरो मतः ॥५॥

अतः परा च का कीर्तिर्यन्मृषासौ न भाषते ।
एवं विधो नरो नूनं विना क्लेशेन सिद्धिभाक् ॥६॥

न वक्तव्यं न वक्तव्यं मृषावाक्यं कदाचन ।
सत्यमेव परो धर्मः किं परैर्धर्मसाधनैः ॥७॥

विमलैः सलिलैर्यद्वद् गात्रं शुद्धयति देहिनाम् ।
एवमेव मनुष्याणां मानसं सत्यभाषणैः ॥८॥

अन्यान् सर्वविधान्नैव प्रकाशान् मन्यते सुधीः ।
सत्यमेव परं ज्योतिर्विजानाति विशुद्धधीः ॥९॥

बहुवस्तूनि दृष्टानि तत्रैकं सारवत्तरम् ।
इदमेव मया ज्ञातं यत्सत्यं परमोत्तमम् ॥१०॥

परिच्छेदः ३१

क्रोधत्यागः

सत्यां निग्रहशक्तौ हि क्रोधत्यागः सुशोभते ।
यतः शक्तिविहीनस्य क्षान्त्याऽक्षान्त्या च किं भवेत् ॥१॥

अथ चेन् निग्रहेऽशक्तिस्तदा कोपो निरर्थकः ।
अथ चेन् निग्रहे शक्तिस्तदा कोपो घृणास्पदः ॥२॥

हानिकर्ता भवेत् कोऽपि कोपो हेयस्तथापि सः ।
अनर्था येन जायन्ते शतशो दुःखदायिनः ॥३॥

मोदं विहन्ति कोपोऽयमानन्दध्वन्सकारकः ।
अन्यो नास्ति ततः कोऽपि शत्रुर्हानिविधायकः ॥४॥

भद्रमिच्छसि चेद् भद्र[1] कोपं मुञ्च सुदूरतः ।
अन्यथाऽऽक्रम्य शीघ्रं ते स विनाशं विधास्यति ॥५॥

अग्निर्दहति तद्वस्तु तत्पार्श्वे यस्य संस्थितिः ।
भस्मीकरोति कोपस्तु क्रुध्यन्तं सकुटुम्बकम् ॥६॥

निधाय हृदि रोषं यो निधानमिव रक्षति ।
भूमिं संताड्य हस्तेन पीडितः स प्रमत्तवत् ॥७॥

सम्प्राप्य महतीं हानिं क्रोधाग्नौ संज्वलत्यपि ।
इदं भद्रतरं नूनं यत् कोपाद्भव दूरगः ॥८॥

त्वरितं तस्य सिध्यन्ति सर्व एव मनोरथाः ।
येन दूरीकृतो नित्यं क्रोधोऽयं शान्तचेतसा ॥९॥

स्ववशे नैव यश्चण्डः[2] स नूनं मृतसन्निभः ।
यश्च कोपपरित्यागी योगितुल्यो विभाति सः ॥१०॥

---

१. कल्याणम् । २. अत्यन्तकोपी ।

परिच्छेदः ३२

उपद्रवत्यागः

लोभादिदोषनिर्मुक्तो विशुद्धहृदयो नरः ।
दत्ते त्रासं न कस्मैचिद् अपि कौवेरसम्पदे ॥१॥

द्वेषबुद्ध्या महत्कष्टं विधत्ते यदि दुष्टधीः ।
न कुर्वते तथाप्यार्या वैरशुद्धिं विकल्मषाः ॥२॥

अहेतौ यो व्यथां दत्ते मे तस्मै च तथैव ताम् ।
दास्येऽहमिति संकल्पे दुश्चिकित्स्या विपत्तयः ॥३॥

अहितस्य हितं कुर्याद् ह्रिया येन मृतो भवेत् ।
विनयार्थं हि दुष्टानामेषैव श्लाघ्यपद्धतिः ॥४॥

यो न वेत्ति परस्यापि स्वस्येव व्यसने व्यथाम् ।
कोऽर्थस्तस्य नरस्याहो तीक्ष्णयापि महाधिया ॥५॥

दुःखानि यानि भुक्तानि स्वयमेव मनीषिणा ।
परस्मै तानि नो जातु देयानीति विचिन्तयेत् ॥६॥

ज्ञातभावेन कस्मैचित् स्वल्पा अपि मनोव्यथाः ।
न दत्ते यस्ततः कोऽन्यः श्लाघ्यो भवति भूतले ॥७॥

यानि दुःखानि भुक्तानि स्वयमेव मुहुर्मुहुः ।
न जातु तानि देयानि परस्मै सारसंग्रहः ॥८॥

मध्याह्ने यद्यहो कश्चिद् बाधते प्रतिवेशिनम् ।
तद्दिने प्रहरादूर्ध्वं स्वयं सैव विपद्यते ॥९॥

दुष्कर्मकारिणां शीर्षमाक्रमन्त्यापदः सदा ।
अपकृत्यान्यतो भद्रास्त्यजन्तीह निरन्तरम् ॥१०॥

परिच्छेदः ३३

अहिंसा

अहिंसा परमो धर्मो धर्मेषु श्रेष्ठसम्मतिः ।
हिंसा च सर्वपापानां जननी लोकविश्रुता ॥१॥

इदं हि धर्म सर्वस्वं शास्तृणां वचने द्वयम् ।
क्षुधार्तेन समं भुक्तिः प्राणिनाञ्चैव रक्षणम् ॥२॥

अहिंसा प्रथमो धर्मः सर्वेषामिति सम्मतिः ।
ऋषिभिर्बहुधा गीतं सूनृतं तदनन्तरम् ॥३॥

अयमेव शुभो मार्गो यस्मिन्नेवं विचारणा ।
जीवः कोऽपि न हन्तव्यः क्षुद्रात्क्षुद्रतरोऽपि सन् ॥४॥

हिंसां दूरात् समुत्सृज्य येनाहिंसा समादृता ।
उदात्तः स हि विज्ञेयः पापत्यागिषु वै ध्रुवम् ॥५॥

अहिंसाव्रतसम्पन्नो धन्योऽस्ति करुणामयः ।
सर्वग्रासी यमोऽप्यस्य जीवने न क्षमो भवेत् ॥६॥

विपत्तिकाले सम्प्राप्ते प्राप्ते च प्राणसंकटे ।
तथाप्यन्यप्रियप्राणान् मा जहि त्वं दयार्द्रधीः ॥७॥

श्रूयते बलिदानेन लभ्यन्ते वरसम्पदः ।
पवित्रस्य परं दृष्टौ तास्तुच्छाश्च घृणास्पदाः ॥८॥

येषां जीवननिर्वाहो हिंसायामेव निर्भरः ।
विबुधानां सुदृष्टौ ते मृतस्वादकसन्निभाः ॥९॥

पूतिगन्धसमायुक्तं पश्य शीर्णं कलेवरम् ।
स घातकचरो नूनं बुधैरित्यनुमीयते ॥१०॥

परिच्छेदः ३४

संसारानित्यता

अहो मोहस्य माहात्म्यमज्ञानं चाथ किं परम् ।
अध्रुवं यद् ध्रुवं वेत्ति न च स्वस्यैव बोधनम् ॥१॥

समायाति महालक्ष्मीः प्रेक्षणे जनसंघवत् ।
विनिर्याति महालक्ष्मीस्तदन्ते जनसंघवत् ॥२॥

समृद्धो यदि जातोऽसि द्रुतमेव विधेहि तत् ।
यत्कार्यं सुस्थिरं लोके यतो वित्तं न शाश्वतम् ॥३॥

कालो यद्यपि निर्दोषः सरलश्चाथ दृश्यते ।
परं कृन्तति सर्वेषामायुः क्रकचसन्निभः[1] ॥४॥

शीघ्रतैव सदा कार्या विबुधैः शुभकर्मणि ।
को हि वेत्ति कदा जिह्वा स्तब्धा स्यात् सह हिक्कया ॥५॥

ह्य एव मनुजः कश्चिदासीदखिलगोचरः ।
स एवाद्य नरो नास्ति नूनमित्येव विस्मयः ॥६॥

को जानाति पलस्यान्ते जीवनं मे भवेन्न वा ।
परं पश्यास्य संकल्पान् कोटिशो हृदि संस्थितान् ॥७॥

पत्त्रं प्राप्य यथा पत्त्री स्फुटिताण्डं विहाय च ।
उड्डीयते तथा देही देहाद् याति स्वकर्मतः ॥८॥

असौ मृत्युः समाम्नातो निद्रातुल्यो विदाम्वरैः ।
जीवनं तस्य विच्छेदः स्वापाज्जागृति सन्निभम् ॥९॥

आत्मनो वै निजावासः किंस्विन्नास्तीह भो जनाः ।
हीनस्थाने यतो देहे भुङ्क्ते वासेन पीडनम् ॥१०॥

---

१. करपत्रसदृशः ।

परिच्छेदः ३५

त्यागः

मन्ये ज्ञानी प्रतिज्ञाय यत्किञ्चित् परिमुञ्चति ।
तदुत्पन्नमहादुःखान्निजात्मा तेन रक्षितः ॥१॥

अनेकसुखरत्नानामाकरस्त्यागसागरः ।
चिरं सुखाभिलाषा चेद् भव त्यागपरायणः ॥२॥

निग्रहं कुरु पञ्चानामिन्द्रियाणां विकारिणाम् ।
प्रियेषु त्यज संमोहं त्यागस्यायं शुभक्रमः ॥३॥

सर्वसंगपरित्यागो यमिनां व्रतमिष्यते ।
पुनर्बन्धनप्राप्तिर्हि त्यक्तोपात्तैकवस्तुना ॥४॥

भवचक्रनिवृत्तीच्छोरस्ति कायेऽपि हेयता ।
कथमावश्यकास्तस्य भिन्ना बन्धनहेतवः ॥५॥

'अहं' 'ममेति' संकल्पो गर्वस्वार्थित्वसम्भृतः ।
जेतास्य याति तं लोकं स्वर्गादुपरिवर्तिनम् ॥६॥

अतितृष्णाभिभूतो यो लोभं नैव जिहासति ।
स दुःखैर्ग्रस्यते नित्यं यतो मुक्तिर्न जातुचित् ॥७॥

विरक्तो मोक्षमार्गस्थो निर्मोहः सर्ववस्तुनि ।
अन्ये संसारिणः सर्वे मोहजालवशीकृताः ॥८॥

न चाप्नोति पुनर्जन्म लोभमोहजयक्षणात् ।
बन्धनं यैस्तु नोच्छिन्नं भ्रमजाले पतन्ति ते ॥९॥

शरणं व्रज तस्यैव येन मोहो विनिर्जितः ।
आश्रयी भव तस्यैव छिद्यते येन बन्धनम् ॥१०॥

परिच्छेदः ३६

सत्यस्यानुभूतिः

अनित्ये खलु संसारे किञ्चित् सत्यं न विद्यते ।
सत्यं पश्यन्ति ये तत्र तेषां दुःखितजीवनम् ॥१॥

मिथ्याभावविनिर्मुक्त आत्मदृष्टिश्च यो नरः ।
दुःखमोहौ समुच्छिद्य स शान्तिमधिगच्छति ॥२॥

असत्यं यः परित्यज्य लभते सत्यदीपकम् ।
तत्कृतेऽतिसमीपस्थः स्वर्गो भूवलयादपि ॥३॥

यद्यात्मन् शाश्वतं सत्यमनुभूतं न जातुचित् ।
नरयोनौ तदा जन्मग्रहणेनापि को गुणः ॥४॥

इयानेवात्र सत्यांशः शेषस्तत्प्रत्यनीकभाक् ।
इदमेव परिज्ञानं मेधाया वरलक्षणम् ॥५॥

येन सत्यमभिज्ञातं स्वाध्यायतपसोर्बलात् ।
स धन्यो याति तद्धाम यद्गत्वा न निवर्तते ॥६॥

ध्यानप्रभृतियोगाङ्गैर्येन सत्यं समर्जितम् ।
भाविजन्मसमादाने का चिन्ता तस्य योगिनः ॥७॥

अविद्या भवरोगस्य जननी सर्वदेहिनाम् ।
तन्मुक्त्या सह चित्प्राप्तिरेषैव प्राज्ञता परा ॥८॥

मोक्षमार्गस्य यो ज्ञाता मोहारेश्च जयोद्यतः ।
तस्य भावीनि दुःखानि यान्ति शान्तिमयत्नतः ॥९॥

कामः क्रोधस्तथा मोहो यथा स्युः क्षीणशक्तिकाः ।
तथानुगामिदुःखानि क्षीयन्तेऽधिकमात्रया ॥१०॥

परिच्छेदः ३७

कामनाया दमनम्

एकस्यापि पदार्थस्य कामना बीजसंततिः ।
प्रतिजन्तु यतो जन्मनिष्पत्तिः फलशालिता ॥१॥
कामनां कर्तुमिच्छा चेत् तर्हि मुक्तौ विधीयताम् ।
सोऽधिकारी परं तत्र येनेयं कामना जिता ॥२॥
निर्दोषं हि महद्वस्तु निष्कामित्वं महीतले ।
स्वर्गेऽपि नास्ति तत्तुल्यो द्वितीयः कोषसंग्रहः ॥३॥
कामनायाः परित्यागान्नान्या काचित् पवित्रता ।
तत्त्यागस्तु परब्रह्मपदप्राप्त्यभिलाषया ॥४॥
मुक्तास्त एव सन्तीह निर्जिता यैस्तु कामना ।
अन्ये च बन्धनैर्बद्धाः स्वतन्त्रा इव भान्ति ते ॥५॥
हातव्या कामना दूरात् स्वकल्याणं यदीच्छसि ।
तृष्णाजालस्वरूपेयमन्ते नैराश्यकारिणी ॥६॥
विषयाशाः परित्यक्ताः सर्वथा येन धीमता ।
मुक्तिरायाति तत्पार्श्वे निर्दिष्टेनैव वर्त्मना ॥७॥
यो न कामयते किञ्चिद् दुःखान्यपि न तत्कृते ।
बम्भ्रमीति य आशावान् दुःखानां तस्य राशयः ॥८॥
स्थिरं सुखं मनुष्येण प्राप्तुमत्रापि शक्यते ।
दुःखानुबन्धिनी तृष्णा विध्वस्ता चेत् स्वशक्तितः ॥९॥
इच्छाभिस्तु नरः कोऽपि संतृप्तो नैव भूतले ।
पूर्णतृप्तः स एवास्ति येनाशात्याग आदृतः ॥१०॥

परिच्छेदः ३८

भवितव्यता

नरो दृढप्रतिज्ञः स्याद् भाग्यलक्ष्मीप्रसादतः ।
स एव याति शैथिल्यं हतभागस्य दोषतः ॥१॥

शक्तेर्ह्रासो मनुष्याणां दुर्भाग्यात्सम्प्रजायते ।
बुद्धेः स्फूर्तिस्तु लोकानां जागृते पुण्यकर्मणि ॥२॥

कोऽर्थो ज्ञानेन जातेन चातुर्येणापि को गुणः ।
अन्तरात्मा यतो नित्यं सर्वोपरि प्रभाववान् ॥३॥

द्वे वस्तुनीह संसारे विभिन्ने सर्वथा पृथक् ।
एकं तत्र धनाढ्यत्वं द्वितीयं साधुशीलता ॥४॥

शुभोऽप्यशुभतां याति सति भाग्ये पराङ्मुखे ।
अनुकूले सति त्वस्मिन्नशुभोऽपि शुभायते ॥५॥

यत्नेनापि न तद् रक्ष्यं भाग्यं नैव यदिच्छति ।
भाग्येन रक्षितं वस्तु प्रक्षिप्तं नापि नश्यति ॥६॥

महाशासकदैवस्य शासनातिक्रमेण वै ।
उपभोक्तुं न शक्तोऽस्ति कोट्यधीशो वराटिकाम् ॥७॥

निर्धना अपि जायन्ते कदाचित् त्यागबुद्धयः ।
भाविदुःखकृते दैवं परं तत्रास्ति बाधकम् ॥८॥

सुखे न जायते येषामुद्वेलो हर्षसागरः ।
दुःखं प्राप्य कथं लोके शोकमग्ना भवन्ति ते ॥९॥

दैवस्य प्रबला शक्तिर्यतस्तद्ग्रस्तमानवः ।
यदैव यतते जेतुं तदैवाशु स पात्यते ॥१०॥

परिच्छेदः ३१

राजा

सेना मंत्री सुहृत् कोषो दुर्गः सार्कं जनाश्रयः ।
षडेते सन्ति यत्पार्श्वे राजसिंहः स भूतले ॥१॥
साहसं बुद्धिरौदार्यं कार्यशक्तेश्च पूर्णता ।
आवश्यका इमे सर्वे गुणाः शासनकारिणः ॥२॥
शासनाय समुत्पन्नान् न त्यजन्ति गुणास्त्रयः ।
विद्या निर्णयसामर्थ्यं नित्यश्चापि परीक्षणम् ॥३॥
नूनं स एव राजास्ति यो न धर्मात् प्रमाद्यति ।
अधर्मघ्नः सदाचारी वीरः सम्मानरक्षकः ॥४॥
राज्यसाधनविस्फूर्तिर्वृद्धिश्चापि कथं भवेत् ।
कथं कोषस्य पूर्णत्वं कथमायव्ययौ च मे ॥
धनस्य परिरक्षा च कथं मे वर्ततेऽधुना ।
एतत्सर्वं हि विज्ञेयं राज्ञा स्वहितकांक्षिणा ॥५॥ (युग्मम्)
प्रजानां खलु सर्वासां सुलभं यस्य दर्शनम् ।
नाप्युद्वेगकरं वाक्यं तस्य राज्यं समुन्नतम् ॥६॥
औचित्येन समं दानं प्रेमयुक्तश्च शासनम् ।
एतद्द्वयं हि यस्यास्ति स भूपो लोकविश्रुतः ॥७॥
रक्षणे नित्यमुद्युक्तो निष्पक्षो न्यायकर्मणि ।
धन्य एवंविधो भूपः स नूनं भुवि देवता ॥८॥
कर्णयोरप्रियाञ् शब्दाञ् श्रोतुं शक्नोति यो नृपः ।
तस्यच्छत्रतलेऽजस्रं सकलेयं वसुन्धरा ॥९॥
उदारो न्यायसम्पन्नः प्रजासेवी दयारतः ।
य एवं वर्तते भूपो ज्योतिष्मान् स हि राजसु ॥१०॥

परिच्छेदः ४०

शिक्षा

अधिगम्यं हि यज्ज्ञानं सामस्त्येन तदर्जयेत् ।
आचरेच्च तथा नित्यं विद्याप्राप्तेरनन्तरम् ॥१॥

द्वे चक्षुषी मनुष्याणां जातेर्जीवितजागृते ।
एकं वर्णसमाम्नायो द्वितीयश्चाङ्कसंग्रहः ॥२॥

यः शिक्षितः स एवास्ति चक्षुष्मानिह भूतले ।
अन्येषान्तु मुखे नूनमस्ति गर्तद्वयाकृतिः ॥३॥

सहैव नयते मोदं विद्वान् यत्रापि गच्छति ।
प्रमोदोऽपि ततो याति यतश्चायं निवर्तते ॥४॥

न्यक्कृतोऽपि भवञ्छिष्टैर्धनिकैरिव भिक्षुकः ।
प्रयत्नेन पठेद् विद्यां ह्यधमा ज्ञानदूरगाः ॥५॥

तावदेव जलं भूरि यावत् स्रोतो निखन्यते ।
एवञ्च तावती विद्या यावती सा हि पठ्यते ॥६॥

सर्वत्र विदुषां गेहं स्वदेशश्च महीतलम् ।
यावज्जीवं पुनर्मर्त्याः कथं न ज्ञानरागिणः ॥७॥

एकजन्मनि यज्ज्ञानं गृहीतं देहधारिणा ।
उन्नतं तत् करोतीह जीवमागामिजन्मसु ॥८॥

इयं विद्या यथा मेऽस्ति पुष्कलानन्ददायिनी ।
तथैवेयं परस्यापि सुप्रियातो बुधस्य सा ॥९॥

मनुष्याणां कृते ज्ञानमविनाशी महानिधिः ।
दोषत्रुटिविहीनश्च यस्मादन्यन्न वैभवम् ॥१०॥

परिच्छेदः ४१

शिक्षाया अवहेलना

अध्यास्ते संसदः पीठं पूर्णशिक्षामुपेक्ष्य यः ।
शारीपटं विना सोऽयमक्षैर्दीव्यति धूर्तधीः ॥१॥

अनभ्यस्य श्रुतं यो वा काङ्क्षते वाग्मिगौरवम् ।
युवसु ख्यातिसाकाङ्क्षानुरोजा[1] रमणीव सः ॥२॥

सुशिक्षितानां पुरो धैर्यान् मूर्खश्चेन्मौनमास्थितः ।
गण्यते शिक्षितो लोकैर्विदुषां सोऽपि योगतः ॥३॥

कियानपि भवेद् धीमान् शिक्षाशून्यो हि मानवः ।
आद्रियते परं नैव विद्वद्भिस्तस्य मंत्रणा ॥४॥

अवहेलितशिक्षो यः पण्डितं मन्यते निजम् ।
सुस्पष्टं सोऽपि लज्जेत यदा भाषेत संसदि ॥५॥

अशिक्षितजनस्याहो दशोषरमहीनिभा ।
स जीवत्यतो नास्ति वार्ता तद्विषयेऽपरा ॥६॥

विदुषां वैभवहीनत्वं मनसे नैव रोचते ।
आढ्यता किन्तु मूढानामप्रियास्ति ततोऽधिका ॥७॥

भव्यानि सूक्ष्मतत्त्वानि यद्बुद्धिर्नावगाहते ।
तद्देहस्य सुसौन्दर्यं मृण्मूर्तेरिव मण्डनम् ॥८॥

उच्चवंशप्रसूतोऽपि लघुतामेत्यशिक्षितः ।
विद्यावृद्धः कुवंश्योऽपि लभते किन्तु गौरवम् ॥९॥

पशुभ्योऽयं नरो यावान् साधुर्भवति भूतले ।
अशिक्षितेभ्यो वरस्तावान् शिक्षितोऽप्यस्ति विश्रुतः ॥१०॥

---

१. उरोजहीना ।

परिच्छेदः ४४

दोषनिवृत्तिः

क्रोधदर्पौ हतौ यस्य विषये चास्तकामनाः ।
अपूर्वमेव तस्यास्ति सौभाग्यद्योति गौरवम् ॥१॥

प्रभुत्वजनितो दर्पो गृध्नुता विषयान्धता ।
भूपे दोषा भवन्त्येते प्रायेणैव विशेषतः ॥२॥

शुभ्रज्योत्स्नासमा कीर्तिः सुप्रिया यस्य विद्यते ।
स्वदोषं सर्षपाकारं तालतुल्यं स मन्यते ॥३॥

दोषाणां त्वं विनाशाय नित्यं भव समुद्यतः ।
अन्यथा सर्वनाशं ते विधास्यन्तीति निश्चयः ॥४॥

भाविदुःखफलं भोक्तुं यः पूर्वं नैव सज्जितः ।
स तथा निधनं याति यथाग्नौ तृणसंहतिः ॥५॥

परशुद्धिविधेः पूर्वं यः स्वदोषान् विशुध्यति ।
के तं दोषाः स्पृशन्तीह भूपालं योगिसन्निभम् ॥६॥

हा धिक् तं कृपणं मर्त्यं व्ययो यस्य न राजते ।
व्ययस्थानेऽपि तस्यान्ते विनाशो ननु निश्चितः ॥७॥

निन्द्यत्वेन समाः सर्वे दुर्गुणाः खलु भूतले ।
परं तत्रापि कार्पण्यं विभिन्नं परिगण्यते ॥८॥

सहसैव प्रसादोऽपि नृणां दोषाय कल्पते ।
लाभेन वर्जितं कार्यं हातव्यं तच्च दूरतः ॥९॥

स्वाभिलाषास्तथा गोप्या यथा वेद्या निजारिभिः ।
न भवेयुः कथंचित् ता निष्फलाः स्युस्ततो द्विषः ॥१०॥

परिच्छेदः ४५

योग्यपुरुषाणां मैत्री

धर्ममाचरतां येषां वृद्धत्वं वयसा समम् ।
नित्यं तेषां सुवात्सल्यं प्रतिपत्त्या समर्जयेः ॥१॥

यदस्ति भावि वा यच्च दुःखं तद् यो व्यपोहितुम् ।
शक्तस्तेन समं मैत्रीं कुरु सोत्साहचेतसा ॥२॥

सन्मानवैः समं सख्यं प्राप्तं यस्य सुदैवतः ।
असंशयं हि सौभाग्यं वर्तते तस्य धीमतः ॥३॥

गुणाधिकस्य सौहार्दं लब्धं येन सुभक्तितः ।
प्राप्ता तेनेदृशी शक्तिस्तुच्छा यत्पुरतोऽपराः ॥४॥

लोकशासकभूपानां सचिवा दृष्टिसन्निभाः ।
अतस्तेषां नियोगोऽपि विधातव्यो यथागुणम् ॥५॥

सत्पुरुषैः समं मैत्री नित्यं यस्य विराजते ।
अपकारं हि तत्साधोः कर्तुं शक्ता न वैरिणः ॥६॥

अपि भर्त्सयितुं शक्तैः सार्धं सख्यस्य गौरवम् ।
यस्यास्ति तस्य के सन्ति भूतले हानिकारकाः ॥७॥

यस्यापेक्षा न साहाय्ये तस्य यः साधु शास्ति तम् ।
असद्भावेऽपि शत्रूणां स च भूपः क्षयोन्मुखः ॥८॥

यथा लाभो न तस्यास्ति नीवी[1] यस्य न विद्यते ।
व्यवस्थापि तथा नास्ति बुद्धिं बुद्धिमतां विना ॥९॥

विरोधो बहुभिः सार्धं मौर्ख्यं सूचयते यथा ।
तथा सख्यविघातोऽपि सद्भिः साकं ततोऽधिकम् ॥१०॥

---

१. मूलधनम् ।

परिच्छेदः ४६

कुसङ्गपरित्यागः

भद्रो बिभेति दुःसंगात् परः संगच्छते तथा ।
अभद्रेण समं नित्यं यथा स्यात् तत्कुटुम्बभाक् ॥१॥

यथाभूमौ वहत्यम्भस्तत्तथा परिवर्तते ।
यादृशी संगतिस्तस्य पुरुषोऽपि तथाविधः ॥२॥

बुद्धेर्यद्यपि सम्बन्धो मस्तकादेव वर्तते ।
यशसः किन्तु सम्बन्धो गोष्ठ्या उपरि निर्भरः ॥३॥

ज्ञायते हृदये वासः स्वभावस्य सदा जनैः ।
परं तस्य निवासस्तु तद्गोष्ठ्यां यत्र स स्वयम् ॥४॥

मनसः कर्मणश्चापि शुद्धेर्मूलं सुसंगतिः ।
तद्विशुद्धौ यतः सत्यां संशुद्धिर्जायते तयोः ॥५॥

पवित्रं हृदयं यस्य संततिस्तस्य पुण्यभाक् ।
यावज्जीवमसौ भद्रः समृद्धः सन् सुखायते ॥६॥

मनःशुद्धिर्मनुष्यस्य निधानं वसुधातले ।
सत्संगश्च ददातीह गौरवं गुणवत्तरम् ॥७॥

आकरा गुणरत्नानां स्वयं सन्ति मनीषिणः ।
सत्संगतिं तथाप्येते मन्यन्ते शक्तिमन्दिरम् ॥८॥

धर्मो गमयति स्वर्गं पुण्यात्मानं विकिल्विषम् ।
धर्मप्राप्त्यै च सद्वृत्ते नियुङ्क्ते सा सुसंगतिः ॥९॥

सत्संगादपरो नास्ति जनस्य परमः सखा ।
दुःसंगाच्च परो नास्ति हानिकर्ता महीतले ॥१०॥

परिच्छेदः ४७

समीक्ष्यकारिता

व्ययः कियान् कियाँल्लाभो हानिर्वा का भविष्यति ।
इतिपूर्वं विचार्यैव कार्यं कुर्वीत धीधनः ॥१॥

मंत्रज्ञैर्मंत्रिभिः सार्धं मंत्रयित्वैव यो नृपः ।
विदधाति स्वकार्याणि तस्यास्ति किमसम्भवम् ॥२॥

सन्त्येवं हि वहूद्योगा ये पूर्वं लाभदर्शकाः ।
समूलघातका अन्ते तेषु हस्तो न धीमताम् ॥३॥

नैवेच्छति निजात्मानं यो यातुं परिहास्यताम् ।
नासमीक्ष्य क्वचित् किञ्चिद् विधत्तेऽसौ विचारवान् ॥४॥

अयनेषु च सर्वेषु व्यूहादिस्थितिसूचिकाम् ।
युद्धसज्जां विना युद्धं राज्ये वैर्यभिषेचनम् ॥५॥

अकर्मणः समाचारान् नूनं नश्यति मानवः ।
कर्मणश्च परित्यागात् सत्यं नश्यति मानवः ॥६॥

नाविचार्य क्वचित् किञ्चिद् विधातव्यं मनीषिणा ।
पूर्वं प्रारभ्य पश्चाच्च शोचन्ति हतबुद्धयः ॥७॥

सन्मार्गं यः समुत्सृज्य स्वकार्याणि चिकीर्षति ।
तस्य यत्ना ध्रुवं मोघाः साहाय्यं प्राप्य भूर्यपि ॥८॥

उपकारोऽपि कर्तव्यः स्वभावं वीक्ष्य देहिनः ।
अन्यथा स्यात् प्रमादेन यातनैव विधायिनः ॥९॥

कुरु तान्येव कार्याणि यान्यनिन्द्यानि सर्वथा ।
निन्द्यकार्याद् यतः प्राणी प्रतिष्ठाभंगमाप्नुयात् ॥१०॥

परिच्छेदः ४९

शक्तेर्विमर्शः

पूर्वं संचिन्त्य विघ्नौघान् शक्तिं स्वस्य परस्य च ।
सध्रीचस्तद्बलञ्चापि[1] दृष्ट्वा कुर्वीत वाञ्छितम् ॥१॥

यथायोग्यकृताभ्यासः स्वशक्तेः पूर्णवेदकः ।
अनुगामी च यो बुद्धेस्तस्य यानं जयोन्मुखम् ॥२॥

स्वं शक्तावधिकम्मन्या बभूवुर्बहवो नृपाः ।
स्वशक्तेरधिकं कार्यं ते प्रारभ्य क्षयं गताः ॥३॥

अहङ्कारविमूढात्मा ज्ञानशून्यो बलाबले ।
शान्तिजीवी च यो नास्ति त्रय एते विनाशिनः ॥४॥

बहूनामप्यसाराणां समवायो हि दुर्जयः ।
केकिपत्रैर्यतः प्राज्यै[2] रथभंगो विधीयते ॥५॥

शक्तिं समीक्ष्य भावानां क्रियां कुर्वीत पण्डितः ।
अधियानं हि नाशाय तरोः शिखरवर्तिनः ॥६॥

विभवं स्वस्य संवीक्ष्य कर्तव्यमतिसर्जनम् ।
अनुरूपं बुधैरेष योगक्षेमविधिः शुभः ॥७॥

संकीर्णापि न चिन्त्यास्ति लोके पूरकनालिका ।
व्ययनाली न विस्तीर्णा यद्यस्ति गृहिणो गृहे ॥८॥

यस्यायव्यययोर्नास्ति लेखो नापि विचारणा ।
कार्यात्पूर्वं स्वशक्तेश्च तन्नामापि न शिष्यते ॥९॥

यः स्ववित्तमनालोच्य व्ययते मुक्तहस्तकः ।
अविलम्बं क्षयं याति विपुलं तस्य वैभवम् ॥१०॥

---

१. सहायकान् । २. प्रचुरै. ।

परिच्छेदः ४९

अवसरसमीक्षा

जयत्यवसरं प्राप्य दिवोलूकं हि वायसः ।
एवञ्चावसरो हेतुर्विजये भूपतेरपि ॥१॥

समयं वीक्ष्य कार्याणां करणं मन्यते बुधः ।
प्रेमरज्वा स्वसौभाग्यश्रियो हि दृढबन्धनम् ॥२॥

क्षेत्रं साहाय्यसम्पत्तिं पूर्वं वीक्ष्य करोति यः ।
कार्यं साधनविज्ञातुस्तस्यास्ति किमसम्भवम् ॥३॥

यदि स्ववसरं वेत्सि साधनानि तथैव च ।
शक्नोषि निजवीर्येण विजेतुं जगतीतलम् ॥४॥

कार्यकालं प्रतीक्षन्ते जोषं हि जयरागिणः ।
न क्षुभ्यन्ति कदाचित्ते नाप्युत्तापविधायिनः ॥५॥

संघातकरणात् पूर्वं यथा मेषोऽपसर्पति ।
तथाऽकर्मण्यता लोके कर्मण्यस्यापि दृश्यते ॥६॥

अमर्षस्य प्रकाशो हि त्वरितं नैव धीमताम् ।
तं गुप्तं हृदये कृत्वा तत्कालं स प्रतीक्षते ॥७॥

विनेतव्यो रिपुस्तावद् यावत्तस्य शुभोदयः ।
विनिपातो यदा तस्य सुखोच्छेद्यस्तदा हि सः ॥८॥

अमोघकालं संप्राप्य विचिकित्सां विहाय च ।
क्षिप्रमेव विधातव्यं कार्यं चेदपि दुष्करम् ॥९॥

पूर्वं निश्चेष्टवदङ्गानि प्राप्ते काले विचक्षणः ।
अनुकूले पुनः [illegible] ाधेत रिपुम् ॥१०॥

परिच्छेदः ५२

पुरुषपरीक्षा

सदसच्चोभयं वेत्ति परमाश्रयते शुभम् ।
एवं यस्य मनोवृत्तिर्नियोक्तव्यः स कर्मसु ॥१॥

शासनाङ्गेषु विस्फूर्तिर्यस्यास्ति प्रतिभावलात् ।
यो हर्ता च विपत्तीनां स कार्यः कार्यवाहकः ॥२॥

दयावान् बुद्धिसम्पन्नः कार्येषु द्रुतनिश्चयः ।
यो लोभेन विनिर्मुक्तः स कार्यो राज्यसेवकः ॥३॥

ईदृशोऽपि जनाः सन्ति येषां सर्वत्र पौरुषम् ।
परं तेऽपि विलोक्यन्ते काले कर्तव्यविच्युताः ॥४॥

कार्येषु पूर्णदाक्षिण्यं शक्तिं शान्तिविधायिनीम् ।
इति वीक्ष्यैव दातव्यं कार्यं न प्रीतिमात्रतः ॥५॥

मानवं योग्यतां वीक्ष्य योग्यकर्मणि योजयेत् ।
योग्यकाले च सम्प्राप्ते कार्यारम्भञ्च कारयेत् ॥६॥

शक्तिं कार्यञ्च वीक्षेत पूर्वं भृत्यस्य भूमिपः ।
पश्चात्कार्यं तदायत्तं[1] विदध्याद् गतसंशयः ॥७॥

तत्पदायोपयुक्तोऽयं यद्येवं निश्चितं त्वया ।
तस्यानुरूपशोभापि तर्हि त्वय्यवशिष्यते ॥८॥

भक्ते दक्षे च यो भृत्ये रुष्टो भवति भूपतिः ।
नूनं तस्य भवेदेव भाग्यश्रीः परिवर्तिता ॥९॥

प्रत्यहं प्रत्यवेक्षेत भृत्यकार्याणि भूप्रभुः ।
भृत्या यत्र विशुद्धा हि तद्राज्यं न विपद्यते ॥१०॥

---

१. तदधीनम् ।

परिच्छेदः ५३

बन्धुता

एकैव बन्धुता यत्र स्नेहस्थैर्यं विलोक्यते ।
अन्यथा विपदां चक्रे क्व च तस्यास्ति दर्शनम् ॥१॥
गुणाढ्ये यत्र बन्धूनां स्नेहो नैवापचीयते ।
तस्य भाग्यवतो वृद्धेः कोऽपि नास्ति निरोधकः ॥२॥
भूत्वा सहृदयो येन बन्धुस्नेहो न लभ्यते ।
तथैव विद्यते सोऽयं निराधारं सरो यथा ॥३॥
वैभवस्य किमुद्देशः किं फलं वाथ विद्यते ।
सम्बन्धिनां समाह्वानं प्रतिपत्त्या च मोहनम् ॥४॥
वाण्यां यस्यातिमाधुर्यमौदार्यञ्च करे तथा ।
तस्य गेहं समायान्ति बन्धवो बद्धपंक्तयः ॥५॥
सार्वं यस्यामितं दानं क्रोधशून्यश्च जीवनम् ।
लोकबन्धुः स एवास्ति पश्यान्विष्य महीतलम् ॥६॥
काको भक्ष्यं यथा स्वार्थाद् बन्धुभ्यो न निगूहते ।
एवं हि प्रकृतिर्यस्य वैभवं तस्य सद्मनि ॥७॥
राजा यथागुणं बन्धून् सत्कुर्याद् गुणरागतः ।
अन्यथा बहवः सन्ति स्वस्वत्वामर्षिणो जनाः ॥८॥
विरागहेतोः संत्यागादपरागोऽपि हीयते ।
एवं चित्तविशुद्धया तु गताप्यायाति बन्धुता ॥९॥
त्यक्तस्नेहोऽपि बन्धुश्चेद् भूयोऽप्ययाति बन्धुताम् ।
सहर्षो मिलतेनामा धृत्वा किन्तु सतर्कताम् ॥१०॥

परिच्छेदः ५६

अत्याचारः

य: प्रजा बाधते नित्यमत्याचारपरायणः ।
शासकोऽसौ न राजास्ति सोऽधमः किन्तु घातकात् ॥१॥

शासनं यस्य हस्तेऽस्ति विनम्रमपि तद्वचः ।
देहि सर्वं न किञ्चित्ते लुण्टाकस्य वचोनिभम् ॥२॥

राज्ये शासनचक्रं यो नृपो नित्यं न वीक्षते ।
न मार्ष्टि च त्रुटीः सर्वाः प्रभुत्वं तस्य क्षीयते ॥३॥

अहो तस्मिन् महाशोको निर्विचारे नरेश्वरे ।
न्यायादपैति यस्तस्य राज्यं वित्तञ्च नश्यति ॥४॥

असंशयं नृपान्यायत्रस्तानामश्रुविन्दवः ।
वाहयन्ति तदीयां हि समृद्धिं सकलामपि ॥५॥

यशसा भूष्यते भूपो यदि न्यायेन शासनम् ।
अकीर्त्या दूष्यते सैव यद्यन्यायेन शासनम् ॥६॥

या दशा जायते क्षोण्या वर्षाशून्ये नभस्तले ।
सा दशा सर्वभूतानां राज्ये निर्दयभूपतेः ॥७॥

अन्यायिनो महीपस्य राज्ये सर्वेऽपि दुःखिनः ।
परा हि दुर्दशा तेषु धनिनां सर्वतोऽधिका ॥८॥

उच्चरते यदा दोषाद्धर्मं न्यायश्च भूपतिः ।
योग्यकालेऽपि तद्राज्ये जायतेऽवग्रहस्तदा ॥९॥

न्याय्यं हि शासनं जह्याद् यदि राजा स्वदोषतः ।
धेनुस्तन्यविलोपः स्याद् द्विजविद्या च विस्मृता ॥१०॥

परिच्छेदः ५७

भयप्रदकृत्यत्यागः

सुप्रणीतं यथासीमं दण्डं दद्यात् तथा नृपः ।
यथा नैव पुनर्दोषं कुर्याद् दण्डितमानवः ॥१॥
स्वप्रभुत्वबलं लोके चिरं वाञ्छन्ति ये नृपाः ।
मृद्वाघातकरं दण्डं ते गृह्णन्तु स्वपाणिषु ॥२॥
योऽसिनैव प्रजाः शास्ति स भूमीशो भयावहः ।
तत्सखः को भवेल्लोके तस्य नाशो विनिश्चितः ॥३॥
सुविख्यातं प्रजावर्गे निर्दयं यस्य शासनम् ।
अकाले स पदाद्भ्रष्टो भूत्वा याति यमालयम् ॥४॥
अगम्यभीमभूपस्य वैभवं तेन सन्निभम् ।
निधिना यत्र संवासो राक्षसस्य दुरात्मनः ॥५॥
योऽमर्षणो नृपः क्रोधाद् ब्रवीत कटुकं वचः ।
समृद्धं वैभवं तस्य द्रुतं नङ्क्ष्यति नङ्क्ष्यति ॥६॥
दण्डदानं बहिःसीमं नित्यं कर्कशभाषणम् ।
इति शस्त्रद्वयं तीक्ष्णं छिनत्ति प्रभुतां दृढाम् ॥७॥
न गृह्णाति पुरा बुद्धिं मंत्रिभ्यो यो महीपतिः ।
क्षोभं याति च वैफल्ये क्षीयते तस्य वैभवम् ॥८॥
कालं लब्ध्वापि येनाहो रक्षोपाया अनादृताः ।
स वेपथुं रणे पश्येत् स्वं स्तब्धो द्रुतपातितम् ॥९॥
यच्चाटुकारिमूर्खाणां परामर्शोऽस्ति निर्भरम् ।
तत् कुत्स्यं शासनं त्यक्त्वा को भारो भून्यथाकरः ॥१०॥

परिच्छेदः ५८

चारुशीलम्

चारुशीलात्परं नास्ति सुरम्यं मोददायकम् ।
कार्यं सुचारुरूपेण सृष्टेस्तेनैव वर्तते ॥१॥
जीवनस्यापि माधुर्यं शीले सत्येव विद्यते ।
भारभूता विपर्यासे जायन्ते मानवा भुवि ॥२॥
अहो गीतेन किं तेन यन्न केनापि गीयते ।
नेत्रेणापि च किं तेन यत्र स्नेहो न दृश्यते ॥३॥
कोऽर्थो नेत्रेण मात्रायां यन्नादरपरं परे[1] ।
केवलं मुखमुद्रायां नूनमस्यास्ति दर्शनम् ॥४॥
नेत्रयोर्भूषणं शीलं यत्र तन्नैव विद्यते ।
अहो ते लोचने नूनं वर्तेते शिरसि क्षते ॥५॥
जायते नैव यस्याक्षि सविचारं परं प्रति ।
सनेत्रोऽपि स किंनेत्रो निर्विशेषश्च भूरुहात् ॥६॥
सत्यमेवाक्षिहीनास्ते येषु नास्ति परादरः ।
सनेत्राः सन्ति ते ये च परदोषे दयालवः ॥७॥
यः कर्तव्ये न वैलक्ष्यं कृत्वा सत्कुरुते परान् ।
तस्य रिक्थे महीराज्यं वर्तते गुणशालिनः ॥८॥
दुःखदेभ्यः क्षमादानं दत्वा नूनं विमोचनम् ।
सहैव स्नेहदानं चेत् ख्याता चित्तसमुन्नतिः ॥९॥
यदीच्छसि निजं लोके शीलनेत्रसमन्वितम् ।
तद्विषं तर्हि पानीयं यत् ते साक्षाद् विमिश्रितम् ॥१०॥

---

१. परस्मिन् ।

परिच्छेदः ५१

गुप्तचरः

नेत्रद्वयेन भूपालो वीक्षते राज्यसंस्थितिम् ।
राजनीतिस्तु तत्रैकं द्वितीयं चरसंज्ञकम् ॥१॥

भूपतेरितिकर्तव्ये कर्तव्योऽयं विनिश्चितः ।
केषाञ्चिच्चरितं पश्येत् प्रत्यहं चरचक्षुषा ॥२॥

न वेत्ति घटनाचक्रं चारैर्दूतैश्च यो निजैः ।
स शक्तोऽपि दिशो जेतुं न शक्नोति महीपतिः ॥३॥

रिपूणां राजभृत्यानां बान्धवानाञ्च भूपतिः ।
गतिं मतिञ्च विज्ञातुं नियुञ्जीत 'चरं' सदा ॥४॥

आकृतिर्यस्य नुर्नास्ति क्वापि सन्देहकारिणी ।
वाग्मी निगूढभावश्च स चरो गुणवत्तरः ॥५॥

वर्णितापसवेशेषु स्वान्तर्भावं निगूहयन् ।
येन केनापि यत्नेन स्वकार्यं साधयेच्चरः ॥६॥

परमर्मसमादाने निपुणो यो निसर्गतः ।
यस्य कार्यमसंदिग्धं शुद्धश्चासौ चरो मतः ॥७॥

अपरस्यावसर्पस्य तादृशीमेव सूचनाम् ।
प्राप्य पूर्वचरस्योक्तौ कुर्यात् प्रामाण्यनिर्णयम् ॥८॥

परस्परमजानन्तः स्पशाः कुर्युः समीहितम् ।
त्रयाणामेकवाक्ये तु सत्यं बुध्येत भूपतिः ॥९॥

न हि स्वराज्यचाराणां पुरस्कारं प्रकाशयेत् ।
अन्यथाकरणे राज्ञा राज्यमेव प्रकाश्यते ॥१०॥

---

१. नरस्य ।

परिच्छेदः ६०

उत्साहः

उत्साहभूषिता एव सत्यं सम्पत्तिशालिनः ।
तद्विरुद्धाः पुनर्नैव स्वामिनः स्वश्रियामपि ॥१॥

उत्साह एव लोकेऽस्मिन् सत्यं परमवैभवम् ।
अन्यद्धि सर्वमैश्वर्यं क्षयं यात्येव कर्हिचित् ॥२॥

उत्साहसाधनं येषां करे नित्यं विराजते ।
ते धन्याः सर्वनाशेन न सीदन्ति कदाचन ॥३॥

स धन्यो यः श्रमान्नैव दूरादेव पलायते ।
सौभाग्यश्रीस्तदावासमन्विष्यायात्यनेहसि ॥४॥

क्षुपेभ्यो वारिदानेन पुष्पश्रीः सूच्यते यथा ।
तथोत्साहेन भाग्यश्रीर्ज्ञायते देहधारिणः ५॥

निजलक्ष्यं सदोदात्तं कार्यं कुशलबुद्धिभिः ।
वैफल्येऽपि यतो जाते कलङ्कः कोऽपि नो भवेत् ॥६॥

पराजितोऽप्यनुत्साहं भजते नैव साहसी ।
शराघातं रणे प्राप्य दृढपादो गजो यतः ॥७॥

तं पश्य क्षीयते लोके यस्योत्साहः शनैः शनैः ।
अपारवैभवानन्दस्तस्य भाग्ये न वर्तते ॥८॥

पीनोन्नतेन देहेन खरदन्तैश्च दन्तिनः ।
को गुणो यदि वीक्ष्यैव मृगेन्द्रं म्रियते मनः ॥९॥

अस्ति नूनं महोत्साहो महाशक्तिर्महीतले ।
ये सन्ति तेन हीनास्ते पशवो देहभेदतः ॥१०॥

परिच्छेदः ६१

आलस्यत्यागः

आलस्यं कुत्सितो वायुः पिण्डाघातेन यस्य हा ।
लुप्यते राजवंशस्याखण्डज्योतिर्धरातलात् ॥१॥

अयमालस्यवानित्थं भाषन्तां मानवा वरम् ।
किन्त्वालस्यं स्वयं बुद्ध्वा हेयं वंशोन्निनीपुणा ॥२॥

घातकं रोचते यस्मा आलस्यं पश्य तं जडम् ।
सह्यभागी स्वयं पश्येज्जीवन्नेव कुलक्षयम् ॥३॥

आलस्यादुच्चकार्येषु येषां हस्तो न वर्तते ।
तद्गृहं क्षीणतां प्राप्य सङ्कटेषु पतिष्यति ॥४॥

कालस्य यापनं निद्रा शैथिल्यं विस्मृतिस्तथा ।
उत्सवस्य महानावः सन्त्येता हतभागिनः ॥५॥

आलस्यनिरतो लोकः कृपां लब्ध्वापि भूपतेः ।
कर्तुं समुन्नतिं नैव शक्नोति जगतीतले ॥६॥

येषामुदात्तकार्येषु व्यापारो नास्ति हस्तयोः ।
न्यक्कारं वा घृणां नित्यं सहन्ते ते प्रमादिनः ॥७॥

आलस्यमन्दिरं लोके जायते यत्कुटुम्बकम् ।
विपद्यते सपत्नानां क्षिप्रमेव करेषु तत् ॥८॥

विपदुन्मुखोऽपि लोकोऽयं चेत् स्याद् विगतालसः ।
स्तभ्नन्ति तर्हि तत्रैवायान्तोऽपि क्रूरसंकटाः ॥९॥

यो न वेत्ति महीपाल आलस्यं नित्यकर्मयुक् ।
त्रैविक्रमैर्मितां पादैः स शास्ति सकलामिलाम् ॥१०॥

परिच्छेदः ६२

पुरुषार्थः

अशक्यमिति संभाव्य कर्म मा मुञ्च दूरतः ।
उद्योगो वर्तते यस्मात् कामसूः सर्वकर्मसु ॥१॥

सामिकार्यं न कुर्वीत लोकरीतिविशारदः ।
तद्विधात्रे यतः कोऽपि स्पृहयेन्न सचेतनः ॥२॥

न जहाति विपत्तौ यः सान्निध्यं तस्य गौरवम् ।
सेवारूपनिधिन्यासाल्लभ्यते तत् सुदुर्लभम् ॥३॥

अनुद्योगवतो नूनमौदार्यं क्लीबखड्गवत् ।
यतस्तयोर्द्वियोर्मध्ये नैकं चास्ति चिरस्थिरम् ॥४॥

सुखे रतिर्न यस्यास्ति कामना किन्तु कर्मणः ।
आधारः स हि मित्राणां विपत्तावश्रुमार्जिकः ॥५॥

उद्योगशीलिता लोके वैभवस्य यथा प्रसूः ।
दारिद्र्याशक्तियुग्मस्य जनकोऽस्ति तथालसः ॥६॥

आलस्यं वर्तते नूनं दारिद्र्यस्य निवासभूः ।
गतालस्यश्रमश्चाथ कमलाकान्तमन्दिरम् ॥७॥

नापि लज्जाकरं दैवाद् वैभवं यदि नश्यति ।
वैमुख्यं हि श्रमात् किन्तु लज्जायाः परमं पदम् ॥८॥

वरमस्तु विपर्यस्तं भाग्यं जातु कुदैवतः ।
पौरुषन्तु तथापीह फलं दत्ते क्रियाजुषे ॥९॥

शश्वत्कर्मप्रसक्तो यो भाग्यचक्रे न निर्भरः ।
जय एवास्ति तस्याहो अपि भाग्यविपर्यये ॥१०॥

---

१. अर्धकार्यम् ।

परिच्छेदः १३

विपदि धैर्यम्

हसन् भव पुरोभागी विपत्तीनां समागमे ।
विपदां हि जये हासः सहायः प्रबलो मतः ॥१॥

अव्यवस्थितचित्तोऽपि भवन्नेकाग्रमानसः ।
विपदां चेत् पुरःस्थायी तत्क्षुब्धाब्धिः प्रशाम्यति ॥२॥

विपदो मन्यते नैव विपदो यो हि मानवः ।
ध्रुवं तस्य निवर्तन्ते विपन्नाः स्वयमापदः ॥३॥

प्राणेषु त्यक्तमोहः सन् यतते यो लुलायवत्[1] ।
जेतुं सर्वापदस्तस्य हताशाः प्रतियान्ति ताः ॥४॥

स्वविपक्षे विपत्तीनां सज्जितां महतीं चमूम् ।
दृष्ट्वापि यस्य नाधैर्यं ततो बिभ्यति ताः स्वयम् ॥५॥

नासीत् सौभाग्यकालेऽपि प्रमोदो यस्य सद्मनि ।
स कथं कथयेत् सर्वं 'हा संप्रति विपद्गतः' ॥६॥

इति वेत्ति स्वयं प्राज्ञो यद्देहो विपदां पदम् ।
अतएव विपन्नोऽपि नानुशोचति पण्डितः ॥७॥

यो विलासप्रियो नास्ति मन्यते चापदस्तथा ।
सहजा जन्मना साकं स दुःखार्तो न जायते ॥८॥

यस्य नास्ति महाहर्षः सम्पत्तीनामुपागमे ।
विषादोऽपि कथं तस्य भवेत् तासामपागमे ॥९॥

मन्यते सुखमायासे धर्मविगळ्ये च यः ।
तं स्तुवन्ति [illegible] रुद्धा अपि वैरिणः ॥१०॥

1. महिष -

परिच्छेदः ६४

मंत्री

महत्त्वपूर्णकार्याणां सम्पादनकुशाग्रधीः ।
समयज्ञश्च तेषां यः स मंत्री स्यान्महीभुजाम् ॥१॥

कौलीन्यं पौरुषं श्रेष्ठं स्वाध्यायो दृढनिश्चयः ।
प्रजोत्कर्षाय सस्नेहचेष्टा मंत्रिगुणा इमे ॥२॥

रिपूणां भेदकर्तृत्वे मित्राणां सख्यवर्धने ।
अरिभिश्च पुनःसन्धौ शक्तिर्यस्य स मंत्रदः ॥३॥

साधूद्योगेषु सुप्रीतिः साधनानां विनिश्चयः ।
सम्मतिः स्पष्टरूपा च मंत्रदातुरिमे गुणाः ॥४॥

स्थानावसरसंवेदी नियमज्ञो वहुश्रुतः ।
सम्यग्विचार्य वक्ता यो मंत्री योग्यः स भूतले ॥५॥

स्वाध्यायाद् यस्य संजाता प्रतिभा सर्वतोमुखी ।
दुर्ज्ञेयं तस्य किं वस्तु विद्यते ननु विष्टपे ॥६॥

भवानुभवसम्पन्नो विद्यावित्तो[1] भवन्नपि ।
पूर्वं विमृश्य मेधावी व्यवहारं सदाऽऽवहेत् ॥७॥

निर्विचारोऽस्तु भूपालो यदि वा कार्यबाधकः ।
तथापि मंत्रिणा वाच्यं हितमेव नरेश्वरे ॥८॥

अनुशास्ति विनाशाय यो मंत्री मंत्रणागृहे ।
सप्तकोटिरिपुभ्योऽपि स शत्रुरधिको मतः ॥९॥

नूनं विमर्शशून्या धीः संप्राप्यापि सुपद्धतिम् ।
व्यवहारे स्खलत्येव सिद्धिश्चापि न गच्छति ॥१०॥

---

१. विद्याया प्रसिद्धः ।

परिच्छेदः ६५

वाक्पटुता

वाग्मित्वं हि वरीवर्ति वरदानं विलक्षणम् ।
तन्नांशोऽन्यस्य कस्यापि स्वतःसिद्धं तदीप्सितम् ॥१॥

मृत्युर्वसति जिह्वाग्रे जिह्वाग्रे ननु जीवनम् ।
अतः सुधीर्वदेद् वाणीं विचार्यैव शुभां सदा ॥२॥

वाचस्ता एव सुश्लाघ्या याः सक्ताः[१] सख्यवर्धने ।
रिपूणामपि कल्पन्ते हृदयाकर्षणाय च ॥३॥

पर्यालोच्य नरः पूर्वं पश्चाद् भाषेत भारतीम् ।
धर्मवृद्धिरतो नान्या लाभश्चापि शुभावहः ॥४॥

वाणी सैव प्रयोक्तव्या यस्यां किञ्चिन्न हेयता ।
अनुल्लंघ्या च या सर्वैर्लब्धसार्वगुणोदया ॥५॥

आशुविद् यः परार्थानां सुवक्ता चित्तकर्षकः ।
अधिकारी स एवास्ति राजनीतेर्विदांवरः ॥६॥

नैव स्खलति यस्यान्तः सुवक्तुर्वादसंसदि ।
कथं पराजयः शक्यस्तस्य निर्भीकचेतसः ॥७॥

ओजस्वि वाङ्मयं यस्य विश्वास्यं परिमार्जितम् ।
तदिङ्गिते नरीनर्ति समस्तं वसुधातलम् ॥८॥

शब्दैः परिमितैरेव स्वाभिप्रायप्रकाशनम् ।
ये जना नैव जानन्ति तेषु वै वावदूकता ॥९॥

निजार्जितं यदि ज्ञानं स्वयं व्याख्यातुमक्षमः ।
नरो न शोभते तद्वन् निर्गन्धं कुसुमं यथा ॥१०॥

---

१. तत्परा. ।

परिच्छेदः ६६

शुभाचरणम्

मित्रत्वेन समायाति साफल्यं सर्ववस्तुषु ।
शुभाचरणवृत्तिस्तु नूनं सर्वत्र कामधुः ॥१॥
यतो न जायते कीर्तिर्लाभश्चापि शुभोदयः ।
वैमुख्यमेव सुश्रेयस्ततोऽस्ति हितकारकम् ॥२॥
अभ्युदयं सदाराध्यं यदि लोके समीहसे ।
तत्कार्यं तर्हि हातव्यं येन कीर्तिर्विहन्यते ॥३॥
विपत्कालेऽपि येषान्तु वस्तुयाथार्थ्यनिर्णयः ।
कुर्वन्ति नैव ते कर्म क्षुद्रं कीर्तिविराधकम् ॥४॥
किं कृतन्नु मयाद्येति पश्चात्तापविधायकम् ।
कार्यं नैव सुधीः कुर्यात् कृतं नाम्रेडितं पुनः ॥५॥
विगर्हितानि सन्तीह यानि कार्याणि साधुभिः ।
जनन्या अपि रक्षार्थं तानि कुर्यान्न जातुचित् ॥६॥
शुभाचारवतः पुंसो दारिद्र्यमपि राजते ।
नत्वाचारविहीनस्य वैभवं धर्मवर्जितम् ॥७॥
निषिद्धान्यपि कार्याणि यो नरो नैव मुञ्चति ।
सफलस्यापि तस्याहो निर्वृतिर्नैव मानसे ॥८॥
विलापैरर्जिता लक्ष्मीः क्रन्दनैः सह नश्यति ।
धर्मेण सञ्चिता सम्पन् मध्ये क्षीणापि वृद्धये ॥९॥
आमकुम्भे भृतं नीरं यथैवास्ति निरर्थकम् ।
तथैव सञ्चितं वित्तं मायया परवञ्चनात् ॥१०॥

परिच्छेदः ६७

स्वभावनिर्णयः

मनोबलात् किमन्यत्र महत्त्वं यशसां चये ।
इतरेषां यतो नास्ति तत्राल्पापि किलांशता ॥१॥
विनिश्चयाय कार्याणां विदुषां निर्णयद्वयम् ।
पूर्णदार्ढ्यं निजोद्देशेऽशक्यस्याथविमोचनम् ॥२॥
न व्यनक्ति निजोद्देशं सिद्धेः पूर्वं सुकर्मठः ।
अलंघ्या अन्यथा पुंसो जायन्ते विपदां चयाः ॥३॥
कथनं सुलभं लोके यस्य कस्यापि वस्तुनः ।
यथापद्धति हस्तेन करणं किन्तु दुर्लभम् ॥४॥
विधानादुच्चकार्याणां सन्ति ये कीर्तिशालिनः ।
सेवन्ते तान् नृपा नत्वा श्लाघन्ते च जनाः सदा ॥५॥
पुमाँश्चेत् सत्यसंकल्पः पूर्णशक्त्या च संभृतः ।
तदेव लभ्यते तर्हि यथा यत्तेन काम्यते ॥६॥
आकृत्यैव नरः कोऽपि नैष्कर्म्यं नाधिगच्छति ।
स एव दृश्यते काले कार्याधारो रथाक्षवत् ॥७॥
सद्बुद्ध्या यत् त्वया कार्यं स्वकर्तव्ये विनिश्चितम् ।
तत्सिद्ध्यै पूर्णशक्त्यैव यतस्वाचलचेतसा ॥८॥
प्रसादकेषु कार्येषु संलग्नो भव चेतसा ।
आक्रान्तोऽपि शतैः कष्टैर्यावदन्तं दृढो भवन् ॥९॥
चरित्रगठने येषां शक्तिमत्ता न विद्यते ।
तेऽन्यदिक्षु महान्तोऽपि न लोके गौरवान्विताः ॥१०॥

परिच्छेदः ६९

कार्यसञ्चालनम्

क्रियते हि परामर्शो निश्चयार्थं विचक्षणैः ।
निश्चये च पुनर्जाते निस्सारं कालयापनम् ॥१॥

अविलम्बसहं कार्यमाशु कुर्वीत धीधनः ।
चिरभावि च यत्कार्यं तत् कुर्याच्छान्तिमास्थितः ॥२॥

लक्ष्येणैव हि गन्तव्यं स्थितिश्चेदनुकूलिनी ।
वामाथ तर्हि गन्तव्यं स्वल्पबाधामये पथि ॥३॥

कार्यं सामिकृतं शत्रुर्नास्ति यश्च पराजितः ।
समये वृद्धिमापन्नौ शेषाग्निरिव दुःखदौ ॥४॥

क्षेत्रं साधनसम्पत्तिं द्रव्यं भावञ्च कालवत् ।
पूर्वं विचार्य पश्चाच्च कार्यं कुर्वीत कोविदः ॥५॥

अत्र कार्ये कियाँल्लाभः श्रमश्चापि कियानथ ।
बाधाश्चापि कियत्यः स्युरिति पूर्वं विचिन्तयेत् ॥६॥

कार्यसिद्धेरसौ मार्गो विद्वद्भिः परिनिश्चितः ।
यद् रहस्यविदं प्राप्य तद्रहस्यं समर्जयेत् ॥७॥

वने हि वशितां याति गजेनैव गजो यथा ।
कार्यक्षेत्रे तथा धीमान् कार्यं कार्येण साधयेत् ॥८॥

मित्रोपहारदानाद्ध्यधिकेयं शुभक्रिया ।
यद् द्रुतं हि विधातव्या रिपूणां सांत्वनक्रिया ॥९॥

दुर्बलाय हिता नैव संकटेषु चिरस्थितिः ।
अतो बलवता साकं काले सन्धिं समर्जयेत् ॥१०॥

परिच्छेदः ६१

राजदूतः

लोकपूज्ये कुले जन्म हृदयं करुणामयम् ।
नृपाणां मोददातृत्वं राजदूतगुणा इमे ॥१॥
निसर्गात् प्रेमवृत्तित्वं वाग्मित्वं विस्मयावहम् ।
प्रतिभावत्त्वञ्च दूतानां त्रयो ह्यावश्यका गुणाः ॥२॥
स्वामिलाभाय येनात्तो[१] भारो भूपतिमण्डले ।
आवश्यकं हि तद्वाण्यां पाण्डित्यं सर्वतोऽधिकम् ॥३॥
प्रभावजननी यस्य मुखमुद्रास्ति पश्यताम् ।
विद्याविभूषितो यश्च स दूतार्हो महीभुजाम् ॥४॥
संक्षेपभाषणं वाण्यां माधुर्यं कटुत्वभाषणम् ।
सुदूताः साधनैरेतैः कुर्वन्ति स्वामिनो हितम् ॥५॥
प्रभावोत्पादिका वाणी वैदुष्यं समयज्ञता ।
प्रत्युत्पन्नमतित्वञ्च दूतस्य प्रथमे गुणाः ॥६॥
स्थानावसरकर्त्तव्यबोधे यस्यातिपाटवम् ।
आलोचितोक्तशब्दो यः स दूतो दूत उच्यते ॥७॥
निसर्गहृदयग्राही विशुद्धात्मा सदाशयः ।
दृढाश्च यस्य संकल्पास्तं दूत्ये[२] खलु योजयेत् ॥८॥
आवेशादपि न ब्रूते दुर्वाक्यं यो विचक्षणः ।
परराष्ट्रे स एवास्ति योग्यः शासनहारकः ॥९॥
च्यवन्ते नैव कर्तव्यात् प्राणैः कण्ठगतैरपि ।
सुदूतः पूर्णयत्नेन साध्नोति स्वामिनो हितम् ॥१०॥

---

१. गृहीतो । २. दूतवणिग्भ्याश्चेति यत् ।

परिच्छेदः ७०

नृपाणां समक्षे व्यवहारः

नातिदूरसमीपस्थो नृपं सेवेत पण्डितः ।
शीतबाधानिवृत्त्यर्थं यथाग्निं सेवते जनः ॥१॥

नृपस्याभीष्टवस्तूनां लालसां त्यज दूरतः ।
ततो वैभवसंप्राप्तेरेषमंत्रोऽस्त्यबाधितः ॥२॥

विरागं भूपतेः प्राप्तुं यदि त्वं नैव वाञ्छसि ।
मुञ्च तर्हि महादोषान् यतः शङ्कास्ति दुस्त्यजा ॥३॥

राज्ञः पुरो न केनामा कर्तव्यं कर्णभाषणम् ।
स्मितेङ्गिते च नो कार्ये आत्मनोभूतिमिच्छता ॥४॥

निलीय शृणुयान्नैव वार्तां काञ्चिन् महीपतेः ।
यत्नश्चापि न कर्तव्यस्तद्गुह्यस्यावबोधने ॥५॥

कालोऽस्ति सांप्रतं कीदृक् प्रकृतिश्चास्य कीदृशी ।
इति पूर्वं समालोच्य वाचा तदनुमोदयेत् ॥६॥

मोदो भवति याः श्रुत्वा वाचस्ता व्याहरेन् नृपम् ।
याभिश्च कोऽपि लाभो न पृच्छ्यमानो न ता वदेत् ॥७॥

बन्धुमल्पवयस्कं वा मत्वा भूपं न हेडताम् ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥८॥

निर्द्वन्द्वः शुद्धदृष्टिर्यो लब्धभूपप्रसादकः ।
न तत्कार्यं स कुर्वीत रुष्टः स्याद् भूपतिर्यतः ॥९॥

घनिष्ठो दृढमित्रश्च वर्तते मम भूपतिः ।
इति मत्वापकृत्ये यो रतो नूनं स नश्यति ॥१०॥

परिच्छेदः ७१

मुखाकृत्याभावपरीक्षणम्

उक्तेः पूर्वं विजानाति मनोभावं परस्य यः ।
स मेधावी सतां वन्द्यो वर्तते भूविशेषकः[1] ॥१॥

मनोगतं हि यो भावं बुद्ध्या समधिगच्छति ।
न स साधारणः किन्तु वर्तते भुवि देवता ॥२॥

आकृतिं वीक्ष्य यः प्राज्ञः परभावं समूहते ।
प्रीत्या केनापि यत्नेन मन्त्रदः स विधीयताम् ॥३॥

उक्तं वेत्ति नरः कश्चिदनुक्तश्चाप्यतुच्छधीः ।
आकृतौ सति साम्येऽति श्रेण्यां भिन्नस्थितिस्तयोः ॥४॥

सकृदेव नरं दृष्ट्वा भावं मानससंस्थितम् ।
बोद्धुं यदक्षमं चक्षुर्वृथा ज्ञानेन्द्रियेषु तत् ॥५॥

भिन्नवर्णसमायोगं व्यनक्ति स्फटिको यथा ।
तथैव सर्वलोकानां वक्त्रं वक्ति हि मानसम् ॥६॥

भावपूर्णमुखं त्यक्त्वा श्रेष्ठमन्यन्न वस्तुकम् ।
मुखं हि सर्वतः पूर्वं हर्षामर्षौ व्यनक्ति नुः[2] ॥७॥

यदि प्राप्तो भवेत्पुण्याद् विना शब्देन भाववित् ।
तदक्षिसन्निकर्षोऽपि जायते ननु सिद्धिदः ॥८॥

आकूतादिपरिज्ञानमुत्तमं यदि वर्तते ।
एकेन तर्हि बुध्येते रागरोषौ हि चक्षुषा ॥९॥

धूर्ता भद्रतराश्चापि सन्ति ये वसुधातले ।
तद्दृष्टिरेव सर्वत्र तेषां भावस्य सूचिका ॥१०॥

---

१. भूतिलकः । २. नरस्य ।

परिच्छेदः ७२

श्रोतॄणां निर्णयः

चित्ते सुरुचिसम्पन्नो वाक्कलायां विशारदः ।
श्रोतृभावं विदित्वादावनुरूपं वदेद् वचः ॥१॥

भो भोः शब्दार्थवेत्तारः शास्तारः पुण्यमानसाः ।
श्रोतॄणां हृदयं वीक्ष्य तदर्हां ब्रूत भारतीम् ॥२॥

श्रोतॄणां प्रकृतिं वेत्तुं यस्य नैवास्ति पाटवम् ।
वक्तृकलानभिज्ञः स निष्कर्मा चान्यकर्मसु ॥३॥

ज्ञानचर्चा तु कर्तव्या विदुषामेव संसदि ।
मौर्ख्ये च दृष्टिमाधाय वक्तव्यं मूर्खमण्डले ॥४॥

त्यज्यते येन नेतृत्वकामना मान्यसंसदि ।
स गुणेष्वस्ति विख्यातो धन्यो वचनसंयमः ॥५॥

यस्यास्ति नैव सामर्थ्यं साफल्यञ्चापि भाषणे ।
न विभाति बुधाग्रे स धर्मभ्रष्टो नरो यथा ॥६॥

लोकातिशायिपाण्डित्यं विदुषां पूर्णवैभवैः ।
उद्द्योतते सभामध्ये विदुषामेव रागिणाम् ॥७॥

धीमतां ननु सान्निध्ये विदुषो ज्ञानकीर्तनम् ।
जीविते तरुसंघाते भाति नीरनिषेकवत् ॥८॥

व्याख्यानेन यशोलिप्सो श्रुत्वेदं स्ववधार्यताम् ।
विस्मृत्याग्रे न वक्तव्यं व्याख्यानं हतचेतसाम् ॥९॥

विरुद्धानां पुरस्तात्तु भाषणं विद्यते तथा ।
मालिन्यदूषिते देशे यथा पीयूषपातनम् ॥१०॥

परिच्छेदः ७३

सभायां प्रौढता

वाक्कला शिक्षिता येन सुरुच्या च समन्विता ।
स वाग्मी विदुषामग्रे सुब्रवीति च्युतिं विना ॥१॥

सिद्धान्तदृढता यस्य राजते विज्ञसंसदि ।
स प्राज्ञो विदुषां मध्ये समाम्नातो विदाम्वरैः ॥२॥

सन्ति शूरा महेष्वासा बहवो रणकोविदाः ।
विरलाः किन्तु वक्तारः सभायां लब्धकीर्तयः ॥३॥

यदुपात्तं स्वयं ज्ञानं तद्विद्वत्सु प्रकाश्यताम् ।
अनुपात्तमथज्ञानं विज्ञेभ्यः साधु शिक्ष्यताम् ॥४॥

अधीष्वसाधुरीत्या त्वं तर्कशास्त्रमसंशयम् ।
न बिभेति हि तर्कज्ञो भाषितुं लोकसंसदि ॥५॥

कोऽर्थस्तस्य कृपाणेन शक्तिर्यस्य न विद्यते ।
किं वा शास्त्रेण भीतस्य तिष्ठतो विदुषां पुरः ॥६॥

श्रोतॄणां पुरतो ज्ञानं बिभ्यतो न हि राजते ।
रणक्षेत्रे यथा खड्गो क्लीवहस्ते न शोभते ॥७॥

विद्वद्गोष्ठ्यां निजज्ञानं यो हि व्याख्यातुमक्षमः ।
तस्य निस्सारतां याति पाण्डित्यं सर्वतोमुखम् ॥८॥

सन्ति ये ज्ञानिनः किन्तु स्थातुं शास्त्रविदां पुरः ।
न शक्नुवन्ति ते नूनमज्ञेभ्योऽपि घृणावहाः ॥९॥

सभ्यानां पुरो यातुं ये भवन्ति भयान्विताः ।
सिद्धान्तवर्णनाशक्तास्ते श्वसन्तो मृताधिकाः ॥१०॥

परिच्छेदः ७४

देशः

देशेषु स महान् देशो यत्र सन्ति महर्षयः ।
धार्मिका धनिकाश्चापि कृषिर्नित्यं समृद्धिभाक् ॥१॥

स एवास्ति महान् देशो यो द्रव्यैर्लोककर्षकः ।
प्रचुरा च कृषिर्यत्र स्वास्थ्यं पूर्णनिरामयम् ॥२॥

समृद्धं पश्य तं देशं सहते यो बहूनपि ।
उत्साहेन रिपोर्वारान् काले च करदायकः ॥३॥

यस्मिन् देशे न दुर्भिक्षं न वा मारी च दृश्यते ।
समन्ताद् रक्षितो यश्च स याति महनीयताम् ॥४॥

महान् स एव देशो यो न विभक्तो विपक्षिषु ।
देशविद्रोहिणः कृत्या न च स्युर्यत्रमण्डले ॥५॥

न जातः शत्रुयानेन लुप्तश्रीर्यो हि जातुचित् ।
जातोऽप्यथायपूर्णो यः स देशो रत्नसन्निभः ॥६॥

भूमिवारि नदीवारि नभोवारि महीधरः ।
सुदृढो दुर्गवर्गश्च देशस्यावश्यका इमे ॥७॥

समृद्धिरुर्वराभूमिरारोग्यं सुखशालिता ।
रिपुभ्यश्च परित्राणं देशभूषणपञ्चकम् ॥८॥

सहजा जीविकोपाया यस्मिन् सन्ति स वस्तुतः ।
देशोऽस्ति तत्पुरोऽन्ये तु समकक्षा भवन्ति नो ॥९॥

तावन्न राजते देशो युक्तोऽपि बहुभिर्गुणैः ।
यावत् तत्र न सौराज्यं प्रजानां परिपालकम् ॥१०॥

परिच्छेदः ७५

दुर्गः

उपकर्ता यथा दुर्गो निर्बलानां स्वरक्षिणाम् ।
सबलानां तथैवैष नास्ति न्यूनः सहायकृत् ॥१॥
वनदुर्गो गिरेर्दुर्गो मरुदुर्गोऽथ वारिणः ।
दुर्गः प्राकारदुर्गश्च सन्ति दुर्गा अनेकधा ॥२॥
दार्ढ्यमुत्सेधविष्कम्भावजय्यत्वञ्च सर्वतः ।
दुर्गाणां हि विनिर्माणे नूनमावश्यका गुणाः ॥३॥
यो दार्ढ्ये किञ्चिदूनोऽपि शत्रूणां मदभञ्जकः ।
पर्याप्तो यत्र विस्तारो स दुर्गः प्रवरो मतः ॥४॥
दुर्गसैनिकरक्षायाः प्रबन्धो वस्तुसंग्रहः ।
अजय्यत्वञ्च दुर्गस्य सन्ति ह्यावश्यका गुणाः ॥५॥
आवश्यकपदार्थानां यत्र पर्याप्तसंग्रहः ।
रक्षितो यो हि वीरैश्च स दुर्गो दुर्ग उच्यते ॥६॥
चिरानुबन्धावस्कन्दसुरङ्गाभिश्च यं रिपुः ।
विजेतुं नैव शक्नोति स दुर्गो दुर्ग उच्यते ॥७॥
विजयाय कृतोद्योगान् परिवारकसैनिकान् ।
अपि जेतुं क्षमो यश्च सैव दुर्गोऽस्त्यसंशयम् ॥८॥
सैव दुर्गोऽस्ति यच्छक्तेस्तत्रस्था रक्षका भटाः ।
दूरादेव बहिः सीम्नो घातयन्ति स्ववैरिणः ॥९॥
पूर्णसाधनसम्पन्नः सुदुर्गोऽपि निरर्थकः ।
यदि प्रमादिनः सन्ति रक्षकाः स्फूर्तिविच्युताः ॥१०॥

परिच्छेदः ७६

धनोपार्जनम्

तुच्छोऽपि गुरुतां याति विश्रुतिश्चाप्यविश्रुतः ।
धनेन मनुजो ह्येवं शक्तिः क्वान्यत्र दृश्यते ॥१॥

निर्धनानां हि सर्वत्र न्यक्कारः खलु जायते ।
धनिकानाञ्च सर्वत्र प्रतिपत्तिर्विवर्द्धते ॥२॥

अविश्रान्तमहज्ज्योतिरहो वित्तं हि भूतले ।
स्थानं तमोवृतं येन ज्योत्स्नापूर्णं विधीयते ॥३॥

निर्दोषैः पापशून्यैर्यत् साधनैः प्राप्यते वसु ।
ततो वहन्ति स्रोतांसि सुखस्य सुकृतस्य च ॥४॥

यद्धनं दयया रिक्तं प्रेमशून्यञ्च विद्यते ।
तज्जिघृक्षा न कर्तव्या स्पर्शो वा तस्य नो वरः ॥५॥

दण्डद्रव्यं मृतद्रव्यं करस्वं शुल्कजं धनम् ।
युद्धद्रव्यञ्च भूपस्य कोपसंवृद्धिहेतवः ॥६॥

अनुकम्पा हि भूतानां विद्यते प्रेमसंततिः ।
तत्पालनाय धात्र्येषा सम्पत्तिः करुणाभृता ॥७॥

गिरिशृङ्गाद् यथा निर्भीः प्रेक्षते करिणो रणम् ।
तथा कार्यं समारभ्य शङ्कां नाप्नोति वित्तवान् ॥८॥

यदीच्छसि रिपुं जेतुं कर्तव्यस्तर्हि संग्रहः ।
द्रविणस्य यतोऽमोघं शस्त्रमेतज्जयैषिणाम् ॥९॥

येन स्वपौरुषात् पुंसा सञ्चितं हि महाधनम् ।
करमध्ये स्थितौ तस्य धर्मकामावुभावपि ॥१०॥

परिच्छेदः ७७

सेना

शिक्षितं बलसम्पन्नं संकटे चास्तभीतिकम् ।
नृपस्य वस्तुजातेषु श्रेष्ठमस्ति सुसैन्यकम् ॥१॥

अपर्याप्ताभिघातेऽपि नैराश्ये च भयङ्करे ।
स्थितिरक्षां हि कुर्वन्ति शूरा युद्धविशारदाः ॥२॥

अहितं नास्ति नः किञ्चिद् वरं गर्जन्तु तेऽब्धिवत् ।
अलमाखुसहस्रेभ्यः फूत्कारः कृष्णभोगिनः ॥३॥

च्यवते या न कर्तव्यान्नानुभूतपराजया ।
प्रदर्शितस्वशौर्या च सैव सेना वरूथिनी ॥४॥

यमेन पूर्णक्रुद्धेन समं यस्याः सुसाहसम् ।
योद्धुं विशोभते तस्याः सेनाख्या वीरकाङ्क्षिता ॥५॥

प्रतिष्ठावीरते ज्ञानं युद्धानां पूर्ववर्तिनाम् ।
बुद्धिमत्वञ्च सेनाया गुणाः सन्नाहसन्निभाः[१] ॥६॥

आक्रम्यापि रिपुर्नूनं जितः स्यादिति निश्चयात् ।
गवेषयन्ति निर्भीकाः स्वशत्रुं सुभटोत्तमाः ॥७॥

न चेत् सज्जा नवाशक्तिः प्रचण्डाक्रमणाय च ।
विभवौजःप्रतापाश्च सेनायास्त्रुटिपूरकाः ॥८॥

या न्यूना नास्ति संख्यायां नार्थाभावेन पीडिता ।
तस्या अस्ति जयो नूनं सेनाया इति निश्चयः ॥९॥

सेनापतेरसद्भावे न सेना कापि जायते ।
सन्तु यद्यपि भूयांसः सैनिका रणकोविदाः ॥१०॥

---

१. कवचतुल्याः ।

परिच्छेदः ७९

वीरयोद्धुरात्मगौरवम्

रे रे सपत्नसंघात मा तिष्ठ स्वामिनः पुरः ।
स योद्धुं यैः पुराहूतः साम्प्रतं ते चिताश्मसु ॥१॥

कुन्ताघातो गजे मोघोऽप्यस्ति गौरवदायकः ।
शशे किन्तु शराघातो सफलोऽपि न मानदः ॥२॥

नूनं तदेव वीरत्वं येन ह्याक्रम्यते रिपुः ।
शरणागतवात्सल्यं रूपञ्चास्त्यस्य सुन्दरम् ॥३॥

स्वकुन्तं करिदेहान्तः प्रवेश्यान्यं गवेषयन् ।
निष्कासयँश्च गात्रस्थं स्मयते स भटाग्रणीः ॥४॥

रिपुप्रासप्रहाराच्चेज्जातं नेत्रनिमीलनम् ।
तर्हि ख्यातस्य वीरस्य का लज्जा स्यादतः परा ॥५॥

न पश्यन्ति यदा शूराः स्वाङ्गमालीढशोभितम् ।
तदा दिनानि मन्यन्ते व्यर्थानि क्षीणचेतसः ॥६॥

प्राणेषु त्यक्तमोहः सन् कीर्तिं लोकान्तसंश्रिताम् ।
ईप्सते यस्तदंघ्रिस्थो निगडोऽपि सुशोभते ॥७॥

यस्य नास्ति भयं मृत्योर्युद्धे स सुभटोत्तमः ।
आतङ्कादपि सेनान्यो भटनीतिं न मुञ्चति ॥८॥

अभीष्टकार्यसिद्ध्यर्थं वीरा उद्योगशालिनः ।
यदि प्राणैर्वियुक्ताः स्युस्तर्हि के दोषवादिनः ॥९॥

यं समीक्ष्य भवेत् स्वामी वाष्पपूर्णाकुलेक्षणः ।
भिक्षया चाटुकारैश्च तं मृत्युं प्रार्जयेद् भटः ॥१०॥

परिच्छेदः ७९

मित्रता

किमस्ति कठिनं लोके शिष्टैः श्लाघ्या सुमित्रता ।
तत्समो दृढसन्नाहो यतो नास्ति महीतले ॥१॥

सतां भवति मैत्री तु ज्योत्स्नाचन्द्रकलासमा ।
असताश्च पुनः सैव तमिस्रेन्दुकलानिभा ॥२॥

मैत्री भवति गुण्यानां श्रुतिस्वाध्यायसन्निभा ।
उत्तरोत्तरवृद्धा हि द्योतन्ते यत्र सद्गुणाः ॥३॥

नैवामोदविनोदार्थं मित्रताद्रियते बुधैः ।
अपि भर्त्सनया मित्रं मार्गस्थं क्रियते तया ॥४॥

सदैव सहगामित्वं भूयोभूयश्च दर्शनम् ।
सख्यस्य वर्धने नैव कारणं किन्तु मानसम् ॥५॥

विनोदकारिणी गोष्ठी नैवास्ते मित्रतागृहम् ।
मैत्री प्रेमामृतोद्भूता हृदयाह्लादकारिणी ॥६॥

कापथाद्बहिराकृष्य नियुङ्क्ते न्यायकर्मणि ।
उपतिष्ठते च दुःखेषु यत् तन्मित्रं प्रगण्यते ॥७॥

गृहीतोऽरं यथा पाणी वायुविच्युतमंशुकम् ।
विपन्नमित्रकार्याणि सुसखः कुरुते तथा ॥८॥

आस्थानं कुत्र सख्यस्य यत्रास्ते हृदयैकता ।
उभे च यत्र चेष्टेते मिलित्वा श्रेयसे मिथः ॥९॥

उपकारप्रसंख्यानं यत्रास्ति प्रीतिधारिणाम् ।
दारिद्र्यं तत्र गर्वोक्त्या गाढस्नेहस्य घोषणा ॥१०॥

परिच्छेदः ९०

सख्यार्थं योग्यतापरीक्षा

अपरीक्ष्यैव मैत्री चेत् कः प्रमादो ह्यतः परः ।
भद्राः प्रीतिं विधायादौ न तां मुञ्चन्ति कर्हिचित् ॥१॥

अज्ञातकुलशीलानां मैत्री संकटसंहतिः ।
सति प्राणक्षये यस्याः शान्तिर्भवति पूर्णतः ॥२॥

कथं शीलं कुलं किं कः सम्बन्धः का च योग्यता ।
इति सर्वं विचार्यैव कर्तव्यो मित्रसंग्रहः ॥३॥

प्रसूतिर्यस्य सद्वंशे कुकीर्तेश्च बिभेति यः ।
मूल्यं दत्त्वापि तेनामा[1] कर्तव्या खलु मित्रता ॥४॥

अन्विष्यापि समं तेन मैत्री कार्या विपश्चिता ।
सुमार्गाच्चलितं मित्रं यो भर्त्सयति नीतिवित् ॥५॥

विपत्स्वपि महानेकः सुगुणः सर्वसम्मतः ।
यदापन्मानदण्डेन ज्ञायते मित्रसंस्थितिः ॥६॥

अस्मिन्नेवास्ति कल्याणं नराणां सौख्यवर्द्धनम् ।
यन्मूर्खस्य सदा हेया मैत्री दुर्गतिकारिणी ॥७॥

औदासीन्यनिरुत्साहभृता हेया विचारकाः[2] ।
बन्धुता सापि हातव्या विपत्तौ या पराङ्मुखी ॥८॥

सम्पत्तौ सह संवृद्धा विपत्तौ ये च मायिनः ।
मैत्रीस्मृतिर्हि तेषान्तु मृत्युकालेऽपि दाहदा ॥९॥

विशुद्धहृदयैरार्यैः सह मैत्रीं विधेहि वै ।
उपयाचितदानेन[3] मुञ्चस्वानार्यमित्रताम् ॥१०॥

---

१. सह । २. कुत्सितविचाराः । ३. देवोपहारदानेन ।

परिच्छेदः ८१

घनिष्टमित्रता

घनिष्टमित्रता सैव तयोरस्त्यनुरूपयोः ।
यत्रात्मा प्रीतिपात्राय यथाकामं समर्प्यते ॥१॥

सत्यरूपात् तयोर्मैत्री वर्तते विज्ञसम्मता ।
स्वाश्रितौ यत्र पक्षौ द्वौ भवतो नापि बाधकौ ॥२॥

यदि नास्ति वयस्यस्य स्वातन्त्र्यं मित्रवस्तुनि ।
सौहार्देनापि किं तेन क्रियाविकलरूपिणा ॥३॥

प्रगाढमित्रयोरेकः किमप्यनुमतिं विना ।
कुरुते चेद् द्वितीयोऽपि सख्यमाध्याय हृष्यति ॥४॥

मित्रकृत्येन केनापि यदि ते दूयते मनः ।
तस्यार्थः सख्युरज्ञानं किं वा वामेकतानता ॥५॥[1]

अभिन्नहृदयं मित्रं सुसखो नैव मुञ्चति ।
वरमस्तु विनाशस्य हेतुरेव तदाश्रयः ॥६॥

येन साकं चिरस्नेहो यश्चासीत् सुप्रियो हृदि ।
कुर्वन्नपि व्यलीकानि स प्रियो न घृणास्पदम् ॥७॥

मित्रं नैव सुमित्रस्य सहते दोषकीर्तनम् ।
निन्दको दण्ड्यते यस्मिन् तदहस्तस्य तोषदम् ॥८॥

अन्तर्हिमालयाद्यस्य प्रेमगङ्गा परान् प्रति ।
वहत्यखण्डधारायां भूप्रियः सोऽपि जायते ॥९॥

यस्य स्नेहो न शैथिल्यं याति मित्रे चिरन्तने ।
तस्मै मानवरत्नाय स्निह्यन्ति रिपवोऽप्यलम् ॥१०॥

---

१. युवयोः ।

परिच्छेदः ८२

विघातिका मैत्री

विघातिनी तयोर्मैत्री यौ प्रदर्शयतो बहिः ।
सख्यं किन्तु ययोः किञ्चिद् वर्तते नैव मानसे ॥१॥

पतन्ति पदयोः स्वार्थात् स्वार्थभावाच्च दूरगाः ।
ये धूर्तास्ते हि हातव्यास्तत्सख्येनापि को गुणः ॥२॥

अस्मात् सख्युरियाँल्लाभः स्यादित्येवं विचारयन् ।
नरो भवति चौराणां वेश्यानाञ्च कुपंक्तिषु ॥३॥

पलायते यथा युद्धात् पातयित्वाश्ववारकम् ।
कुत्स्यसप्तिस्तथा[1] मायी का सिद्धिस्तस्य सख्यतः ॥४॥

विश्वस्तं सुहृदं काले मुञ्चता सह मायिना ।
सख्यस्थापनमश्रेयः श्रेयान् ननु विपर्ययः ॥५॥

प्राज्ञैः समं विरोधोऽपि वरं मूढस्य संगतेः ।
सादृश्याय यतो नूनं वर्द्धन्ते गुणराशयः ॥६॥

स्वार्थिनां चाटुकर्तॄणां सौहार्दाद् वैरिणामहो ।
असह्यापि घृणा साध्वी शतगुण्या मता बुधैः ॥७॥

तव पाणीकृते कार्ये योऽस्ति बाधाविधायकः ।
किञ्चितं प्रति मा ब्रूहि मैत्रीं मुञ्च शनैः शनैः ॥८॥

अन्यदेव खलु ब्रूते कुरुते चान्यदेव यः ।
स्वप्नेऽप्यशुभरूपास्ति तेनामा सख्यकल्पना ॥९॥

एकान्ते स्तौति यो नित्यं बहिर्निन्दति दुष्टधीः ।
वृत्तिरेवंविधा यस्य स ह्युपेक्ष्यो विमर्शिना ॥१०॥

---

१. दुष्टाश्व. ।

परिच्छेदः ८३

कपटमैत्री

मैत्रीप्रदर्शनं शत्रोः केवलं स्थाणुयोजना[1] ।
समये त्वापि[2] यत्रासौ ताडयेद्धातुसन्निभम् ॥१॥

हृदये यस्य दुर्भावो बाह्ये यश्च सखीयते ।
कामिन्या इव तच्चित्तं क्षणेनैति विरागताम् ॥२॥

वरमस्तु महाज्ञानं विशुद्धिर्वापि मानवे ।
शत्रोश्चित्ते तथापीह घृणात्यागोऽस्त्यसंभवः ॥३॥

बहिर्हृष्यति यो मायी द्वेष्टि चान्तर्दुराशयः ।
भीतो भव ततो धूर्ताद् यदि प्राणानपेक्षसे ॥४॥

त्वयामा हृदयं येषां विद्यते नैव सर्वथा ।
विश्वासस्तेषु नो कार्यो वदत्स्वपि प्रियं वचः ॥५॥

अहो नूनं क्षणेनैव परिपन्थी प्रकाशते ।
सखेव मधुरालापं कुर्वन्नपि मुहुर्मुहुः ॥६॥

प्रह्वोऽपि च रिपुर्नैव विश्वास्यो दीर्घदर्शिना ।
धनुषो हि विनम्रत्वमनिष्टस्यैव सूचकम् ॥७॥

कृताञ्जली रुदँश्चापि प्रत्येतव्यो न वैरकृत् ।
शस्त्रं संभाव्यते तस्य निगूढं करमध्यके ॥८॥

बाह्ये नौति विविक्ते च घृणार्थं हसति ध्रुवम् ।
बहिः संस्तुत्य तं काले मर्दयेन्मित्रतां गतम् ॥९॥

संधित्सुः[3] खल्वरातिश्चेदशक्तश्च स्वयं बले ।
सन्धिस्तेन समं कार्यः कृत्वा च भव दूरगः ॥१०॥

---

१. स्वर्णकारलोहकीलकम् । २. त्वामपि । ३. संधिं कर्तुमिच्छुकः ।

परिच्छेदः ८४

मूर्खता

मौर्ख्यं किमिति जिज्ञासो शृणु तर्हि वदामि तत् ।
लाभहेतोः परित्यागो ग्रहणं हानिकारिणाम् ॥१॥

अयोग्येऽथ विनिन्द्ये च प्रवृत्तिर्ननु कर्मणि ।
प्रथमा मूढता ज्ञेया तस्याः सर्वासु कोटिषु ॥२॥

मूर्खो विस्मृत्य कर्तव्यमसभ्यं भाषते वचः ।
धर्मो न रोचते तस्मै ह्रीदयाभ्यां स वर्ज्यते ॥३॥

शिक्षितोऽपि सुदक्षोऽपि गुरुत्वे सुस्थितोऽपि सन् ।
लम्पटो योऽक्ष जातानां को मूढस्तादृशो भुवि ॥४॥

अहो स्वयं समाख्याति पूर्वमेव स्वजीवने ।
श्वभ्रस्य विवरे तुच्छे स्वस्थानं खलु मूढधीः ॥५॥

उच्चकार्यं समादत्ते यो मूढो निजहस्तयोः ।
स परं नैव तन्नाशी बन्दी भवति च स्वयम् ॥६॥

मूर्खोपार्जितवित्तेन भवन्ति सुखिनः परे ।
आत्मीयाः किन्तु दुःखार्ताः त्रस्यन्ति क्षुधयातुराः ॥७॥

बहुमूल्यं यदा वस्तु दैवादज्ञेन लभ्यते ।
उन्मत्तसदृशो भूत्वा तदा सोऽयं कुचेष्टते ॥८॥

मैत्री भवति मूर्खाणां सुप्रिया ननु सर्वदा ।
यतो विघटने तस्याः सन्तापो नैव जायते ॥९॥

अविदग्धस्तथा नैव शोभते बुधमण्डले ।
दुग्धोज्ज्वले हि पर्यङ्के यथैव मलिनं पदम् ॥१०॥

परिच्छेदः ८५

अहङ्कारपूर्णा मूढता

दारिद्र्येष्वतिदारिद्र्यं बुद्धेरेव विहीनता ।
निर्धनित्वं क्षयं याति यतो योग्यप्रयत्नतः ॥१॥

स्वेच्छया यदि मूढात्मा दत्ते किञ्चिदुपायनम् ।
सौभाग्यं तत्र पात्रस्य हेतुरन्यो न कश्चन ॥२॥

मूर्खः स्वदोषसंघातैः स्वयं यादृश् विपद्यते ।
तादृग् विपद्युतो नैव क्रियते क्रूरवैरिभिः ॥३॥

सहस्रबुद्धिमात्मानं वेत्ति यो गर्विताशयः ।
नूनं स एव मूढात्मा बोद्धव्यो विदुषां वरैः ॥४॥

अज्ञातविषयज्ञानं दर्शयित्वा हि मन्दधीः ।
विज्ञातविषयज्ञाने संशीतिं जनयत्यसौ ॥५॥

मूढानां हि निजाङ्गेषु को गुणः पटधारणात् ।
अस्त्यसंवृतदोषाणां मानसे यदि संस्थितिः ॥६॥

भेदं कमपि यः क्षुद्रः स्वान्तिकेन न गोपितम् ।
कर्तुं शक्नोति तन्मूर्ध्नि वर्तते विपदां चयः ॥७॥

नो शृणोति न चावैति शृणोति यो दुराग्रही ।
स हि मूढः स्वबन्धूनां दुःखदोऽस्ति निरन्तरम् ॥८॥

प्रबोधनाय मूर्खस्य यतन्ते येऽपि धार्मिकाः ।
शुद्धं नावैति मूढोऽयं मार्गं ज्ञानविनिश्चितम् ॥९॥

अपि लोकमतं वस्तु यो मूर्खो नैव मन्यते ।
स मूर्खो [illegible] ज्ञायते गर्वमानवैः ॥१०॥

परिच्छेदः ८६

उद्धतता

औद्धत्येन परेषान्तु परिहासं करोति यः ।
अनेन दुर्गुणेनैव सोऽस्ति लोके घृणावहः ॥१॥

पार्श्ववासी यदि ज्ञात्वा कदाचित् कलहेच्छया ।
त्वां बाधते तथापीदं वरं त्रासादवैरिता ॥२॥

कलहस्य चिराभ्यासो महाव्याधिरहो खले ।
लभन्ते तेन निर्मुक्ताः प्रतिष्ठामन्तवर्जिताम् ॥३॥

भण्डवृत्तिं महागर्ह्यां मुञ्चतः खलु दूरतः ।
हृदये परमाह्लादो जायते वै निसर्गतः ॥४॥

विद्वेषभावनां चित्ताद् योहि दूराद् व्यपोहति ।
सर्वप्रियः स लोके स्यात् प्रकृत्या चारुतां गतः ॥५॥

हृदयं ह्लादते यस्य विद्वेषे प्रतिवासिनः ।
तस्याधःपतनं शीघ्रममन्दञ्च भविष्यति ॥६॥

मात्सर्याद् यश्च भूपालो सर्वैः साकं विरुध्यते ।
कलहे तस्य लिप्तस्य राज्यवृद्धिः कथं भवेत् ॥७॥

विग्रहस्य विधेस्त्यागाद् वैभवं वर्द्धते सदा ।
तस्य संवर्द्धनात् किन्तु व्यृद्धिरेवाभिवर्द्धते[1] ॥८॥

सर्वाविशं जहात्येव नरः पुण्यस्य वैभवात् ।
अथ पापात् स एवाहो विद्वेष्टी प्रतिवेशिनम् ॥९॥

विद्वेषस्य फलं लोके विद्वेषो ह्यस्ति नापरः ।
भवतः शिष्टवृत्तौ च शान्तिरेवं समन्वयः ॥१०॥

---

१. ऋद्धेरभावः ।

परिच्छेदः ८७

शत्रुपरीक्षा

सबलेनारिणा साकं न योद्धव्यं मनीषिणा ।
अविश्रम्य क्षणं किन्तु संयुध्याशक्तवैरिणा ॥१॥

यस्य निर्दयिनः केऽपि नैव सन्ति सहायकाः ।
अशक्तश्च स्वयं सोऽयमाक्रामति कथं रिपुम् ॥२॥

प्रतिभा धैर्यमौदार्यं यत्र नास्ति गुणत्रयी ।
प्रत्यन्तराज्यविद्वेषी सुजय्यः स महीपतिः ॥३॥

जिह्वा यस्य वशे नास्ति कटुर्यश्च निसर्गतः ।
न्यक्क्रियते स भूपालो सर्वैः सर्वत्र भूतले ॥४॥

अदक्षो योऽस्ति कर्तव्ये स्वमानानभिरक्षकः ।
राजनीते रसंवेदी स नृपो रिपुमोददः ॥५॥

किङ्करो यस्तु लिप्सानां चण्डो वा बुद्धिवर्जितः ।
सपत्नास्तस्य भूपस्य वैरार्थं स्वागतोद्यताः ॥६॥

कार्यं प्रारभ्य पश्चाद् यो वैफल्याय विचेष्टते ।
मूल्यं दत्त्वापि तद्वैरं गृहणीयाद् हितवान्नरः ॥७॥

नैकोऽपि सद्गुणो यत्र दोषाणां किन्तु राशयः ।
तस्य मित्रं न कोऽपि स्यादमित्रानन्दवर्षिणः ॥८॥

बालिशैः कातरैः साकं यदि युध्यन्ति शत्रवः ।
तदा भवति तेषां तु प्रवृद्धो हर्षसागरः ॥९॥

पार्श्वस्थ राजभिर्मूढैः सार्धं यो नैव युध्यति ।
जयाय यत्नहीनश्च स राजा नो प्रतिष्ठितः ॥१०॥

परिच्छेदः ९८

शत्रून्प्रति व्यवहारः

नन्वेका राक्षसी लोके शत्रुतानामधारिणी ।
विनोदेऽपि न सा कार्या स्वयमेव विपश्चिता ॥१॥
वरं करोतु हे भद्र वैरं वै शस्त्रपाणिना ।
परं कुर्यान्न ते नामा वाणी यस्यासिसन्निभा ॥२॥
उन्मत्तः स हि भूपालो यस्यैको न सहायकृत् ।
परमाह्वयते योद्धुमनेकानपि वैरिणः ॥३॥
अमित्रमपि मित्रं यो कर्तुं शक्तोऽस्ति पाटवात् ।
सुस्थिरा तस्य राज्यश्रीर्जयश्रीश्च करे ध्रुवा ॥४॥
असहायः स्वयश्चैको विरोधे द्वौ च वैरिणौ ।
एकेन तर्हि संदध्यादपरं युधि योजयेत् ॥५॥
संकल्पितोऽपि शत्रुर्वा सखा चैव परागमे ।
प्रतिवेशी न कर्तव्यो माध्यस्थ्ये हितवृत्तिता ॥६॥
अजानतां पुरो नैव भाषणीया विपत्तयः ।
त्रुटयोऽपि न वक्तव्या रिपूणां पुरतस्तथा ॥७॥
युक्तिसाधनसम्पन्नः सुव्यवस्थः सुरक्षितः ।
अहो चेदसि शत्रूणां द्रुतं गर्वो विनङ्क्ष्यति ॥८॥
छेद्यः कण्टकिनो वृक्षा जाता एव मनीषिणा ।
छेत्तुरेवान्यथा पाणी कुर्वन्ति क्षतविक्षतौ ॥९॥
अवज्ञातू रिपोर्नैव शक्ता ये मानभञ्जने ।
ते नूनमधमा लोके न च स्युश्चिरजीविनः ॥१०॥

परिच्छेदः ८१

गृहभेदी

कुञ्जः पुष्करवर्षी च नूनं चेद् रोगवर्द्धकौ ।
अप्रियौ भवतस्तद्वद् वन्धुरप्यहितः परः ॥१॥

तस्माद् द्विषो न भेतव्यं योऽस्ति नग्नासिसन्निभः ।
भेतव्यं हि ततोऽमित्रादैति[1] यो मित्रकैतवात् ॥२॥

अप्रमत्तो निजं रक्षेदन्तर्द्विष्टाद् रिपोः सुधीः ।
कस्यर्त्यवसरे शत्रुरन्यथा चक्रिसूत्रवत् ॥३॥

अहितो यदि ते कश्चिन् मित्रत्वं यत्र न्यस्यते ।
स भेदमुपसंधाय विधास्यति विपद्गृहम् ॥४॥

स्वजना यदि संक्रुद्धाः स्वयं विद्रोहभाजिनः ।
सन्निपाते विपत्तीनां जीवनं तर्हि यास्यति ॥५॥

आस्थाने यस्य भूपस्य विद्यते कपटस्थितिः ।
एकदा सोऽपि तद्दोषात् तस्या लक्ष्यं भविष्यति ॥६॥

ययोर्भेदस्तयोरैक्यं नैव दृष्टं महीतले ।
पिधानेनावृतं पात्रं भिन्नमेव स्वरूपतः ॥७॥

भेदबुद्धिर्गृहे येषां भूमिसाद्वै भवन्ति ते ।
घर्षणीयंत्रसंभिन्नलोहस्य कणका यथा ॥८॥

पारस्परिकसंघर्षः स्वल्पोऽपि तिलसन्निभः ।
यत्रास्ति तत्र सर्वस्वनाशो नृत्यति मस्तके ॥९॥

विद्विष्टेन समं भूते प्रतिपत्तिं विनैव यः ।
उटजे फणिना साकं नूनं वासं करोति सः ॥१०॥

---

१. आगच्छति ।

परिच्छेदः १०

महतामवज्ञात्यागः

यो वाञ्छति निजं श्रेयः स साधोरपमानतः ।
आत्मानं सततं रक्षेन् महायत्नेन शुद्धधीः ॥१॥

यः करिष्यति मूढात्मा न्यक्कारं हि महात्मनाम् ।
पतन्ति मूर्ध्नि तच्छक्त्या विपदो वीतसंख्यकाः ॥२॥

अनादृत्य हितान् गच्छ सर्वनाशं यदीच्छसि ।
विरोधी भव तेषाञ्च यच्छक्तिः सर्वनाशिनी ॥३॥

सबलं शक्तिसम्पन्नं योऽवजानाति रोषतः ।
स स्वजीवनघाताय मृत्युमाह्वयते कुधीः ॥४॥

बलिनां भूपतीनाञ्च क्रोधं संवर्धयन्नरः ।
पृथिव्यां क्वापि गत्वापि सुखवान् नैव जायते ॥५॥

दहनादपि संरक्षा कदाचित् संभवत्यहो ।
अरक्ष्याः सर्वथा किन्तु मन्ये साध्ववहेलिनः ॥६॥

आत्मशक्तौ महाशूराः क्रुद्धा यदि महर्षयः ।
कुतो हि जीवनानन्दः का सिद्धिश्च समृद्धिषु ॥७॥

विशालं दृढमूलञ्च राज्यं यस्य स भूमिपः ।
उच्छिद्यते यतेः क्रोधाद् ऋषयो ह्यद्रिसन्निभाः ॥८॥

ऋषयो व्रतसंशुद्धा यदि स्युर्वक्रदृष्टयः ।
आस्तामन्यत् स सक्रोऽपि स्वपदात् प्रच्युतो भवेत् ॥९॥

आत्मशक्तेः परा देवाः क्रुद्धा यदि महर्षयः ।
नरस्य कुत्र रक्षास्ति श्रित्वापि बलिनो जनान् ॥१०॥

परिच्छेदः ९१

स्त्रीदासता

नासो महत्त्वमाप्नोति यो नारी पादपूजकः ।
आर्यस्तु कुरुते नैव कार्यमीदृग्विधं मुधा ॥१॥

अनङ्गरङ्गकेलौ यः प्रसक्तो विषयातुरः ।
गर्हितः स समृद्धोऽपि स्वयमेव विलज्जते ॥२॥

क्लीव एव नरः सोऽयं स्त्रियो यो हि वशंवदः ।
भद्रेषु लज्जितो भूत्वा नैवोद्ग्रीवः प्रयाति सः ॥३॥

अहो तस्मिन् महाखेदः स्त्रियो यो हि विकम्पते ।
अभव्यः स च निर्भाग्यः संभाव्या नैव तद्गुणाः ॥४॥

स्त्रियो विभ्रमबाणाया यो बिभेति हि कामुकः ।
सद्गुरूणां स सेवायै भजते नापि साहसम् ॥५॥

प्रियाया मृदुबाहुभ्यां ये बिभ्यति हि कामुकाः ।
लब्धवर्णा[1] न ते सन्ति भूत्वापि सुरसन्निभाः ॥६॥

प्रभुत्वं चोलराज्यस्य येन स्वस्मिन्नुपासितम् ।
कन्यायां ह्रीविशिष्टायां ततोऽस्त्यधिकगौरवम् ॥७॥

एषां सर्वत्रकान्तायाः प्रमाणं वाक्यमेव ते ।
मित्राणामिष्टसिद्ध्यर्थं न शक्ता वा सुकर्मणे ॥८॥

नो लभन्ते धनं धर्मं कामिनीराज्यशासिताः ।
प्रेमामृतरसस्वादे नापि ते भाग्यशालिनः ९॥

उच्चकार्येषु संलग्नाः सौभाग्येनाभिवर्द्धिताः ।
ते दुर्बुद्धिं न कुर्वन्ति विषयासक्तिनामिकाम् ॥१०॥

---

१. प्राप्तकीर्तयः ।

परिच्छेदः १२

वेश्या

धनाय नानुरागाय नरेभ्यः स्पृहयन्ति याः ।
तासां मृषाप्रियालापाः केवलं दुःखहेतवः ॥१॥

वदन्ति मधुरा वाचः परं ध्यानं धनागमे ।
पण्यस्त्रीणां मनोभावं ज्ञात्वैवं भव दूरगः ॥२॥

कपटप्रणयं धूर्ता दर्शयन्ती मुहुर्मुहुः ।
विलासिनी महावित्तमालिङ्गत्युरसा विटम् ॥

परं तस्य समाश्लेषस्तथा तस्या वभाति सः ।
कुविष्टिवैं यथाऽज्ञातं स्पृशेत् संतमसे शवम् ॥३॥ (युग्मम्)

विशुद्धकार्यसंलग्नाः सद्व्रताः पुरुषोत्तमाः ।
कलङ्कितं न कुर्वन्ति निजाङ्गं वारयोषिता ॥४॥

येषामगाधपाण्डित्यं बुद्धिश्चापि सुनिर्मला ।
रूपाजीवाङ्गसंस्पर्शान् मलिना न भवन्ति ते ॥५॥

न गृह्णन्ति करं तस्या जनाः स्वहितकारिणः ।
विक्रीणाति निजं रूपं स्वैरिणी यातिचञ्चला ॥६॥

अन्वेषयन्ति तां भुक्तामज्ञा एव पृथग् जनाः ।
देहेन स्वजते किन्तु रमतेऽन्यत्र तन्मनः ॥७॥

येषां विमर्शशून्याधीर्मन्यन्ते ते हि लम्पटाः ।
स्वर्वध्वा इव वेश्यायाः परिष्वङ्गं सुधामयम् ॥८॥

गणिका कृतशृङ्गारा नूनं निरयसन्निभा ।
तत्प्रणालश्च तद्बाहुर्यत्र मज्जन्ति कामिनः ॥९॥

दुरोदरं सुरापानं बहुसक्ता नितम्बिनी ।
भाग्यं येषां विपर्यस्तं तेषामानन्दहेतवः ॥१०॥

परिच्छेदः १३

सुरापानत्यागः

मद्यपाने रतिर्यस्य नास्ति तस्माद् रिपोर्भयम् ।
अर्जितं गौरवं तस्य तत एव विनश्यति ॥१॥

सुरापानं न कर्तव्यं केनापि हितमिच्छता ।
पिपासा यदि केषाञ्चित् कर्तव्यं चेदनार्यता ॥२॥

प्रमत्तवदनं वीक्ष्य तन्मातैव जुगुप्सते ।
का कथा तर्हि भद्राणां दृष्ट्वा तस्य मुखाकृतिम् ॥३॥

सुरापानकदभ्यासो यस्य पुंसः कुसंगतः ।
पराङ्मुखी ततो याति सुलज्जा मत्तकाशिनी[1] ॥४॥

अतिलोकमिदं मौर्ख्यं सौभाग्यध्वंसकारणम् ।
मूल्यं दत्त्वा यदादत्ते संमोहस्मृतिशून्यते ॥५॥

विषं पिबन्ति ते नित्यं मदिरापरनामकम् ।
महानिद्राभिभूतास्ते सन्त्येव मृतसन्निभाः ॥६॥

सुगूढापि सुरापीता जनयत्येव विभ्रमान् ।
तेभ्योऽधिगम्य शौण्डत्वं ग्लायन्ति पार्श्ववर्तिनः ॥७॥

हालापलापं मा कुर्या मद्यपानरतोऽपि सन् ।
एवं कृते यतोऽलीकपापमन्यच्च योज्यते ॥८॥

प्रमत्तस्य हिताख्यानं केवलं कालयापनम् ।
उल्कालोको[2] यथा मोघो जलमग्नगवेषणे ॥९॥

मत्तस्य कुगतिं शौण्डः संपश्यति मदात्यये ।
जातां तामेव स्वस्यापि कथं नानुमिनोति हा ॥१०॥

---

१. सुन्दरी । मसालप्रकाशः ।

परिच्छेदः १४

द्यूतम्

जये सत्यपि मा दीव्येद् द्यूतं बुद्धिविभूषितः ।
यतो जयोऽपि नाशाय मत्स्यार्थं वडिशो यथा ॥१॥

शतं यत्र पराजित्य जयत्येकन्तु जातुचित् ।
स्यात्समृद्धः कथं तत्र द्यूतकारो दुरोदरे ॥२॥

प्रायो दीव्यति पाशैस्तु यः संस्थाप्य ग्लहे पणम् ।
अज्ञातजनहस्तेषु वैभवं तस्य गच्छति ॥३॥

द्यूतं यथा तथा नान्यः करोति मनुजं खलम् ।
कुकीर्तिर्जायते यस्मात् प्रेर्यते चाशुभे मनः ॥४॥

सन्त्यनेके पटुम्मन्या मत्ताः पाशककर्मणि ।
परमेको न तत्रास्ति यो नैवानुशयं गतः ॥५॥

दारिद्र्येणान्धतां नीतो द्यूतव्यसनकैतवात् ।
अनुबोभूय दुःखानि म्रियते क्षुधयातुरः ॥६॥

यस्य कालो लयं याति प्रायशो द्यूतसद्मनि ।
पैतृकैर्विभवैः साकं कीर्तिस्तस्य विलुप्यते ॥७॥

द्यूतान् नश्यन्ति वित्तानि प्रामाण्यञ्च विलीयते ।
कठोरं जायते चित्तं द्यूतं दुःखानुबन्धनम् ॥८॥

द्यूतासक्तं विमुञ्चन्ति कीर्तिवैदुष्यसम्पदः ।
नेदमेव व्यथायुक्तो भिक्षतेऽन्नं पटञ्च सः ॥९॥

पराजयादहो द्यूते रतिर्नूनं विवर्द्धते ।
यावज्जीवं दहेत् तृष्णा दुःखार्तञ्च पराजितम् ॥१०॥

परिच्छेदः १५

औषधम्

वातपित्तकफाः काये गुणाः प्रोक्ता महर्षिभिः ।
न्यूनाधिका यदा सन्ति तदा ते रोगकारकाः ॥१॥
भुक्तान्ने जीर्णतां याते यदि भुञ्जीत मानवः ।
आवश्यकं कथं तस्य भवेद् भैषज्यसेवनम् ॥२॥
शान्त्या सदैव भोक्तव्यं भुक्त्वा च परिपाचयेत् ।
पाकान्ते च पुनर्भुक्तिः प्रक्रमश्चिरजीविनः ॥३॥
भुक्तं यावन्न जीर्णं चेत् तावद् विरम भोजनात् ।
परिपाके पुनर्जाते भोक्तव्यं सात्म्यमात्मनः ॥४॥
पथ्यान् रुचिकरान् वृष्यान् यो भुङ्क्ते मोदसंभृतः ।
दुष्टा देहव्यथा तस्य कदाचिन्नैव जायते ॥५॥
यथा मृगयते स्वास्थ्यं रिक्तोदरसुभोजिनम् ।
तथा मार्गयते व्याधिर्मात्राधिक्येन खादकम् ॥६॥
जठराग्निमनादृत्य यो भुङ्क्ते रसलोलुपः ।
असंख्यैर्विविधै रोगैर्ग्रस्यते स सदा कुधीः ॥७॥
रोगो विचार्यतां पूर्वमुत्पत्तिं तदनन्तरम् ।
निदानञ्च समीक्ष्यैव पश्चात् कुर्यात् प्रतिक्रियाम् ॥८॥
को रोगः कीदृशो रोगी कः कालो वर्ततेऽधुना ।
इति सर्वं समीक्ष्यैव विदध्याद् भेषजं भिषक् ॥९॥
भिषग् भैषज्यविक्रेता भेषजं रोगपीडितः ।
चत्वारः सन्ति साफल्ये चिकित्सायाः सुहेतवः ॥१०॥

परिच्छेदः १६

कुलीनता

निसर्गादभिजातानां भवतो द्वौ हि सद्गुणौ ।
हृद्या लज्जास्ति तत्रैको द्वितीयश्च यथार्थता ॥१॥

सदाचारात् सुलज्जायाः सत्यस्नेहाच्च सर्वदा ।
नैवस्खलन्ति सद्वंश्याः ख्यातमेवेति भूतले ॥२॥

कुलीनो हि भवत्येव चतुर्भिः सद्गुणैर्युतः ।
हृष्टास्यो मधुरालापी गर्वशून्य उदारधीः ॥३॥

कोटिसंख्यकमुद्राणां लाभोऽपि किल चेद्वरम् ।
तथापि नो निजं नाम दूषयन्ति सुवंशजाः ॥४॥

पुरातनमहावंशजातान् पश्यन्तु भो जनाः ।
न त्यजन्ति गतैश्वर्या अपि ये स्वामुदारताम् ॥५॥

प्रतिष्ठितं कुलाचारं रक्षितुं ये समुद्यताः ।
ते कुकृत्यं न कुर्वन्ति भवन्ति न च मायिनः ॥६॥

शुद्धान्वये प्रसूतस्य दोषः सर्वैः समीक्ष्यते ।
चन्द्रबिम्बे यथा लग्नः कलङ्कः कैर्न दृश्यते ॥७॥

विशुद्धकुलजातोऽपि भाषते गर्हितं यदि ।
आशङ्कां तर्हि कुर्वन्ति लोकास्तज्जननेऽपि च ॥८॥

आख्याति भूमिमाहात्म्यं यथा वृक्षः फलश्रिया ।
वाणी वक्ति तथा लोके मनुष्यस्य कुलस्थितिम् ॥९॥

सलज्जो भव चेदिच्छा साधुत्वे सद्गुणेषु च ।
औचित्येन समं ब्रूहि चेदिच्छा वंशगौरवे ॥१०॥

---

१. दानप्रियवचनाभ्याम् ।

परिच्छेदः १७

प्रतिष्ठा

आत्मनः पतनं यस्मात् तस्माद् भवतु दूरगः ।
अपि चेत्प्राणरक्षायै तस्यात्यावश्यकी स्थितिः ॥१॥

कामयन्ते निजां कीर्तिं जीवनोपरमेऽपि ये ।
अपि प्रभाववृद्ध्यर्थमयोग्यं कुर्वते न ते ॥२॥

समृद्धौ कुरु हे भव्य विनयश्रीसुवर्पणम् ।
क्षीणस्थितौ तु सम्माने दृष्टिमान् भव सर्वदा ॥३॥

कुकृत्यैर्दूपिता येन स्वप्रतिष्ठा महीतले ।
स मनुष्यस्तथा भाति कर्तिता अलका यथा ॥४॥

गुञ्जातुल्यमपि स्वल्पं कुर्याच्चेत् किल्विषं नरः ।
क्षुद्रो भवति भूत्वापि प्रभावे गिरिसन्निभः ॥५॥

न यशो वर्द्धते यस्मान् नापि स्वर्गश्च लभ्यते ।
घृणाकर्तुः कथं तस्य भक्त्या जीवितुमिच्छसि ॥६॥

घृणाकर्तुः पदर्शादिदमेव वरं ध्रुवम् ।
यद्भाग्ये लिखितं भोक्तुं सज्जः स्यान् निर्विकल्पकः ॥७॥

अनर्घं वस्तु किं कायो यन्मोहान् मोहिता जनाः ।
रक्षन्ति तं महायत्नैर्विक्रीयापि स्वगौरवम् ॥८॥

आत्मानं हन्ति केशेषु कान्तारे चमरी यथा ।
स्वाभिमानी तथा हन्ति मानार्थं स्वस्य जीवितम् ॥९॥

हते माने पुनर्लोके यो न जीवितुमिच्छति ।
लोकास्तस्य यशोवेदौ क्षिपन्ति कुसुमाञ्जलिम् ॥१०॥

परिच्छेदः १८

महत्त्वम्

उच्चकार्यचिकीर्षैव महत्त्वं परिभाष्यते ।
विना तेन भवत्येषा क्षुद्रतानामधारिणी ॥१॥
जन्मना सदृशाः सर्वे मानवाः सन्ति भूतले ।
कीर्तौ किन्तु महान् भेदस्तेषां कार्यप्रभेदतः ॥२॥
कुलीनोऽपि कदाचारात् कुलीनो नैव जायते ।
निम्नजोऽपि सदाचारान् न निम्नः प्रतिभासते ॥३॥
निर्व्याजया बहिर्वृत्या विशुद्ध्या चात्मनः सदा ।
महत्त्वं रक्ष्यते पुंसा यथाशीलं कुलस्त्रिया ॥४॥
साधनानां प्रयोक्तारो महान्तो हि निसर्गतः ।
भवन्त्यशक्यकार्याणां स्रष्टारोऽपि स्वकौशलात् ॥५॥
लघूनां स्वल्पबुद्धीनां सर्ग एव तथाविधः ।
यत् प्रतिष्ठा न पूज्यानां न चेच्छा तत्कृपाप्तये ॥६॥
सम्पत्तिः प्राप्यते काचिद् यदि क्षुद्रैः सुदैवतः ।
मानप्रदर्शनं तेषां निस्सीमं जायते ततः ॥७॥
नीचैर्वृत्तिर्महत्तायां परं नैव प्रदर्शनम् ।
भवतीति सुविख्यातं क्षुद्रता विश्वघोषिका ॥८॥
महतां लघुभिः सार्धं व्यवहारो दयान्वितः ।
स्निग्धश्च जायते किन्तु क्षुद्रो मूर्त इव स्मयः ॥९॥
उदात्ताः परदोषाणां निसर्गादुपगूहकाः ।
अनुदात्ताश्च विद्यन्ते परच्छिद्रगवेषकाः ॥१०॥

परिच्छेदः ११

योग्यता

कार्यस्वरूपमालोच्य योग्यतायै समाहिताः ।
कर्तव्यमेव तत्सर्वं मन्यन्ते यद्गुणास्पदम् ॥१॥

सद्वृत्तमेव भद्राणां सौन्दर्यं सुमनोहरम् ।
देहरूपं परं तत्र नास्ति वैचित्र्यकारणम् ॥२॥

दाक्षिण्यं विश्वबन्धुत्वं लज्जा सूनृतगृह्यता[1] ।
गोपनश्चान्यदोषाणां सद्वृत्तस्तम्भपञ्चकम् ॥३॥

महर्षीणां यथा धर्मः सर्वसत्वानुकम्पनम् ।
भद्राणाञ्च तथा धर्मो दोषस्यानपकीर्तनम् ॥४॥

लघुता नम्रता चापि बलिनामेव सद्बले ।
जयार्थं ते हि शत्रूणां सतां सन्नाहसन्निभे ॥५॥

लघूनामपि योग्यानामादरो गुणरागतः ।
जायते यत्र शाणोऽसौ योग्यतायाः प्रकीर्तितः ॥६॥

कोऽर्थस्तस्य महत्त्वेन योग्यस्यापि महामतेः ।
खलैरपि समं यस्य सद्वृत्तिर्नैव दृश्यते ॥७॥

निर्धनत्वं महादोषो गुणराशिविनाशकः ।
किन्त्वाचारवतः सोऽपि नालं गौरवहानये ॥८॥

विपदां सन्निपातेऽपि सन्मार्गान्न स्खलन्ति ये ।
प्रलयान्तेऽपि ते सन्ति सीमान्ता योग्यताम्बुधेः ॥९॥

विहाय भद्रतां भद्रा अभद्रा हन्त चेदहो ।
मानवानां क्षितिर्भारं वोढुं नैवाक्षमिष्यत ॥१०॥

---

१. सत्यपक्षाश्रितता ।

परिच्छेदः १००

सभ्यता

निर्व्याजचेतसा नित्यं स्वागताय समुद्यताः ।
अपूर्वेषु प्रियालापा भवन्ति प्रियदर्शनाः ॥१॥

ज्ञानमूलाः सुसंस्कारा हृदये च दयालुता ।
चेद् गुणद्वयसम्बन्धाद् हर्षवृद्धिः प्रजायते ॥२॥

आकृतौ सति साम्येऽपि न साम्यं मन्यते बुधः ।
आचारैश्च विचारैश्च साम्यं वै हर्षदायकम् ॥३॥

सन्नीत्या धर्मबुद्ध्या च लोकाननुपकरोति यः ।
स्तुवन्ति सुजनास्तस्य प्रकृतिं पुण्यरूपिणीम् ॥४॥

उक्तं हास्येऽपि दुर्वाक्यं जनानामरुन्तुदम्[1] ।
दुर्व्याहृतं[2] न कर्तव्यं भद्रैस्तस्माद् रिपावपि ॥५॥

सार्वाः सद्गुणसम्पन्ना आर्याः सन्ति महीतले ।
दयादाक्षिण्यसम्पूर्णं तेनेदं वर्तते जगत् ॥६॥

आचारात्पतितो नैव शिक्षितोऽपि शुभावहः ।
सुव्रश्चनो[3] यथा नैव रणे दण्डाद् बृहत्तरः ॥७॥

अनम्रता नरस्यार्यैः सदा सर्वत्र गर्हिता ।
अन्यायिनि विपक्षे वा प्रयुक्ताऽपि न शोभते ॥८॥

स्मितं न जायते यस्य विस्तृते धरणीतले ।
तस्याभाग्यवतो नूनं दिनेऽपि निबिडं तमः ॥९॥

कुपात्रे निहितं क्षीरं यथैवास्ति निरर्थकम् ।
वैफल्यं हि तथा याति वित्तं दुर्जनसद्मनि ॥१०॥

---

१. हृदयव्यथाकरम् । २. दुर्भाषणम् । ३. लोहवर्धनी ।

परिच्छेदः १०१

निरुपयोगिधनम्

निजगेहे कृतो येन विपुलस्त्वर्थसंग्रहः ।
व्यये किन्तु कदर्योऽस्ति ततो मृतवदेव सः ॥१॥

धनमेव परं वस्तु वर्तते वसुधातले ।
इत्यर्थाय मृतो गृध्नू राक्षसोऽमुत्र जायते ॥२॥

वित्तार्थन्तु महोत्साहः कीर्त्यै किन्तु निरादरः ।
येषां ते सन्ति निस्सारा भुवो भाराय केवलाः ॥३॥

स्वस्मिन् नैवार्जिता येन सुप्रीतिः प्रतिवेशिनाम् ।
आशा कास्ति पुनस्तस्य प्राणान्ते यां समुत्सृजेत् ॥४॥

न दत्ते नापि भुङ्क्ते यो लोभोपहतमानसः ।
जातु चेत् कोट्यधीशोऽपि वस्तुतः सोऽस्ति निर्धनः ॥५॥

परस्मै ददते नैव भुञ्जते नापि ये स्वयम् ।
ते सन्ति कृपणा लोके स्वलक्ष्म्या रोगरूपिणः ॥६॥

देशे काले च पात्रे च यद्वित्तं नैव दीयते ।
मोघं तदपि सुन्दर्या वनस्थायाः सुरूपवत् ॥७॥

सन्तो यया न सुप्रीताः सा लक्ष्मीर्ननु तादृशी ।
ग्राममध्ये यथा जातः फलितो विषपादपः ॥८॥

धर्माधर्मावनादृत्य बुभुक्षाञ्च विषह्य यः ।
सञ्चीयते निधिर्नित्यं परेषां स हितावहः ॥९॥

आपन्नार्तिविनाशेन वदान्यस्य दरिद्रता ।
जाता जातु न नित्या सा मेघस्येव सुवर्षणात् ॥१०॥

परिच्छेदः १०२

लज्जाशीलता

भद्रो जिह्रेति लोकेऽस्मिन् प्रमादादेव सर्वदा ।
सुन्दरीणामतो भिन्ना लज्जा भवति सर्वथा ॥१॥

इयं लज्जैव मर्त्येषु वर्तते भेदकारिणी ।
अन्यथा सदृशाः सर्वे वस्त्रसन्तानभुक्तिभिः ॥२॥

वसन्ति सर्वदेहेऽस्मिन् प्राणा यद्यपि देहिनाम् ।
नरस्य योग्यता किन्तु लज्जामावसति ध्रुवम् ॥३॥

हृदये गुणिता लज्जा रत्नतुल्यो महानिधिः ।
उत्सेको गतलज्जस्य चक्षुषोः कष्टकारकः ॥४॥

मानभङ्गं परस्यापि वीक्ष्य स्वस्यैव ये जनाः ।
त्रपन्ते ते महात्मानः शीलसंकोचमूर्तयः ॥५॥

निन्दितैः साधनैर्नापि राज्यं गृह्णन्ति साधवः ।
उपेक्षां तेऽत्र तन्वन्ति कीर्तिकान्तानुरागिणः ॥६॥

लज्जात्राणाय मुञ्चन्ति निजाङ्गं भद्रवृत्तयः ।
न त्यजन्ति ह्रियं वा ते प्राप्तेऽपि प्राणसंकटे ॥७॥

परो हि त्रपते यस्मात् ततो यो नैव लज्जते ।
पतितः स नरो नूनं ततो जिह्रेति भद्रता ॥८॥

विस्मृताश्चेत् कुलाचाराः कुलभ्रष्टोऽभिजायते ।
लज्जायां किन्तु नष्टायां सर्वे नश्यन्ति सद्गुणाः ॥९॥

लज्जावारि मनुष्यस्य चक्षुर्भ्यां किल चेच्च्युतम् ।
जीवनं मरणं तस्य काष्ठपुत्तलसन्निभम् ॥१०॥

परिच्छेदः १०३

कुलोन्नतिः

अहर्निशं श्रमिष्यामि विना श्रान्तिं करद्वयात् ।
नरस्यायं हि संकल्पः कुलोत्कर्षैककारणम् ॥१॥
योगक्षेमपरा बुद्धिः श्रमश्च पौरुषान्वितः ।
इमे स्तो वंशवृद्ध्यर्थं समर्थे द्वे हि कारणे ॥२॥
कुलोन्नतिं यदा कर्तुं नरो भवति सज्जितः ।
कटिबद्धाः सुरा यान्ति तदग्रे स्वयमव्यथाः ॥३॥
येन मुक्तं न चेत्किञ्चित् कुलोत्कर्षचिकीर्षया ।
स्वल्पमप्यस्तु तत्कार्यं सिद्धये किन्तु निश्चितम् ॥४॥
अनघैश्चरितैर्नित्यं यः करोति कुलोन्नतिम् ।
स उदात्तः सदा मान्यस्तन्मित्रं क्षितिमण्डलम् ॥५॥
स वंशो गुरुतां नीतः श्रियि ज्ञाने बले च वा ।
यत्र जन्म मनुष्यस्य पौरुषं तस्य पौरुषम् ॥६॥
वीरमेव यथा युद्धे प्रहरन्त्यरयो भृशम् ।
शक्त स्कन्धौ तथा लोके कुलभारोऽभिगच्छति ॥७॥
कुलोन्नतिं चिकीर्षोस्तु सर्वे काला हितावहाः ।
प्रत्यनीके प्रमादेन कुलपातो विनिश्चितः ॥८॥
कुटुम्बरक्षिणां कायं वीक्ष्यैवं धीः प्रजायते ।
श्रमार्थमथ दुःखार्थं किमसौ विधिना कृतः ॥९॥
यस्य नास्ति कुटुम्बस्य पालकः सत्प्रबन्धकः ।
तन्मूले विपदां घातात् पतनं तस्य जायते ॥१०॥

परिच्छेदः १०४

कृषिः

नरो गच्छतु कुत्रापि सर्वत्रान्नमपेक्षते ।
तत्सिद्धिश्च कृषेस्तस्मात् सुभिक्षेऽपि हिताय सा ॥१॥
कृषीवला धुरा तुल्या देशरूपस्य चक्रिणः ।
अकृपाणा यतः सन्ति नूनं तदुपजीविनः ॥२॥
ये जीवन्ति कृषिं कृत्वा ते नराः सत्यजीविनः ।
परपिण्डादिनः किन्तु सर्वेऽन्ये सन्ति मानवाः ॥३॥
स्निग्धच्छायासु सस्यानां क्षेत्राणि यस्य शेरते ।
तद्देशीयनृपच्छत्रादधः स्युश्छत्रिणः परे ॥४॥
अभिक्षुकाः परं नैव दानिनोऽप्यनिषेधकाः ।
ते सन्ति ये कृषिं नित्यं कुर्वते साधुमानवाः ॥५॥
कृषीवलाः कृषेः कार्याद् विरताश्चेत् कथञ्चन ।
सन्यासिनोऽपि ये जातास्तेऽपि स्युर्वज्रपीडिताः ॥६॥
जलार्द्रा खलु चेन्मृत्स्ना शोषयेत् तां रवेः करैः ।
तुर्यांशस्यावशेषे सा निःखाद्यापि बहूर्वरा ॥७॥
कर्षणात् खाद्यदानेषु निन्द्यदानादनन्तरम्[1] ।
अम्बुसेकाच्च रक्षायां भवन्ति बहवो गुणाः ॥८॥
यः पश्यति कृषिं नैव गृहे नित्यमवस्थितः ।
सुभार्येव कृषिस्तस्मै कुप्यति क्षीणदेहिका ॥९॥
भक्षणाय न मे किञ्चिदस्तीति वचनं भृशम् ।
वदन्तं क्रन्दमानञ्च हसत्युर्वीरमालसम्[2] ॥१०॥

---

१. निन्द्यतृणखण्डनात् । २. पृथ्वीलक्ष्मीरलसम् ।

परिच्छेदः १०५

दरिद्रता

दारिद्र्यादधिकं लोके वर्तते किन्नु दुःखदम् ।
इति पृच्छास्ति चेत्तर्हि शृणु सैवास्ति निःस्वता[1] ॥१॥

हतदैवं हि दारिद्र्यमस्त्येवेहाति दुःखदम् ।
पारलौकिकभोगानामप्यास्ते किन्तु घातकम् ॥२॥

तृष्णानुबन्धिदारिद्र्यं सत्यं गर्ह्यातिगर्हितम् ।
वंशस्य गुरुतां हन्ति वाचो यच्च मनोज्ञताम् ॥३॥

हीनस्थितिर्मनुष्यस्य महती कष्टदायिनी ।
हीना इव प्रभापन्ते सुवंश्या अपि यद्वशात् ॥४॥

अभिशापोऽस्ति दैवस्य दारिद्र्यापरनामकः ।
निलीनाः सन्ति यस्याधो विपदो हि सहस्रशः ॥५॥

रिक्तस्य न हि जागर्ति कीर्तनीयोऽखिलो गुणः ।
अलमन्यैर्न लोकेभ्यो रोचते तत्सुभाषितम् ॥६॥

आदौ रिक्तः पुनर्धर्माद्धीनो यस्तु पुमानहो ।
पौरुषं तस्य संवीक्ष्य तन्मातैव जुगुप्सते ॥७॥

किन्न मुञ्चसि दुःखार्तं मामद्यापि दरिद्रते ।
ह्य एव हि महादुष्टे कृतः सामिमृतस्त्वया[2] ॥८॥

तप्तशूलेषु सुष्वापः कदाचित् सम्भवत्यहो ।
आकिञ्चन्ये च मर्त्यस्य सुखनिद्रा न संभवा ॥९॥

उत्सृजन्ति निजप्राणान् यदि नो निर्धना नराः ।
तर्ह्यन्येषां वृथा याति भक्तं पानञ्च सैन्धवम् ॥१०॥

---

१. निर्धनता । २. अर्धमृतः ।

परिच्छेद १८

निर्लोभिता

परधन लेने के लिए, जिसका मन ललचाय ।
नीतिविमुख वह क्रूरतम, क्षीण-वंश हो जाय ॥१॥

जिसे घृणा है पाप से, वह नर करे न लोभ ।
लगे न वह दुष्कर्म में, बढ़े न जिससे क्षोभ ॥२॥

परसुखचिन्तक श्रेष्ठजन, त्यागें सदा अकार्य ।
क्षुद्र-सुखों के लोभ में, बनते नहीं अनार्य ॥३॥

जिसके वश में इन्द्रियाँ, तथा उदार विचार ।
ईप्सित भी परवस्तु लूँ, उसके ये न विचार ॥४॥

ऐसी बुद्धि न काम की, लालच जिसे फँसाय ।
तथा समझ वह निन्द्य जो, दुष्कृति अर्थ सजाय ॥५॥

उत्तम पथ के जो पथिक, यश के रागी साथ ।
मिटते वे भी लोभवश, रच कुचक्र निज हाथ ॥६॥

तृष्णासंचित द्रव्य का, भोगकाल विकराल ।
त्यागो इसकी कामना, जिससे रहो निहाल ॥७॥

न्यून न हो मेरी कभी, लक्ष्मी ऐसी चाह ।
करते हो तो छीन धन, लो न पड़ौसी आह ॥८॥

विदितनीति परधनविमुख, जो बुध, तो सस्नेह ।
ढूंढ़त ढूंढ़त आप श्री, पहुँचे उसके गेह ॥९॥

दूरदृष्टि से हीन का, तृष्णा से संहार ।
निर्लोभी की श्रेष्ठता, जीते सब संसार ॥१०॥

परिच्छेद १८

निर्लोभिता

१—जो पुरुष सन्मार्ग छोड़ कर दूसरे की सम्पत्ति लेना चाहता है उसकी दुष्टता बढ़ती जायगी और उसका परिवार क्षीण हो जायगा।

२—जो पुरुष बुराई से विमुख रहते हैं वे लोभ नहीं करते और न दुष्कर्मों की ओर ही प्रवृत्त होते हैं।

३—जो मनुष्य अन्य लोगों को सुखी देखना चाहते हैं, वे छोटे मोटे सुखों का लोभ नहीं करते और न अनीति का ही काम करते हैं।

४—जिन्होंने अपनी पाँचों इन्द्रियों को वश में कर लिया है और जिनकी दृष्टि विशाल है, वे यह कह कर दूसरे की वस्तुओं की कामना नहीं करते, ओ हो हमें इनकी अपेक्षा है।

५—वह बुद्धिमान् और समझदार मन किस काम का जो लालच में फँस जाता है और अविचार के कामों के लिए उतारू होता है।

६—वे लोग भी जो सुयश के भूखे हैं और सन्मार्ग पर चलते हैं, नष्ट हो जायेंगे, यदि धन के फेर में पड़कर कोई कुचक्र रचेंगे।

७—लालच द्वारा एकत्रित किये हुए धन की कामना मत करो, क्योंकि भोगने के समय उसका फल तीखा होगा।

८—यदि तुम चाहते हो कि हमारी सम्पत्ति कम न हो तो तुम अपने पड़ोसी के धन-वैभव को ग्रसने की कामना मत करो।

९—जो बुद्धिमान् मनुष्य न्याय की बात को समझता है और दूसरों की वस्तुओं को लेना नहीं चाहता, लक्ष्मी उसकी श्रेष्ठता को जानती है और उसे ढूँढ़ती हुई उसके घर जाती है।

१०—दूरदर्शिताहीन लालच नाश का कारण होता है, पर जो, यह कहता है कि मुझे किसी वस्तु की आकांक्षा ही नहीं, उस तृष्णाविजयी की 'महत्ता' सर्वविजयी होती है।

परिच्छेद १९

चुगली से घृणा

'खाता यह चुगली नहीं', पर की ऐसी बात ।
सुनकर खल भी फूलता, जिसे न नीति सुहात ॥१॥

परहित तज, पर का अहित, करना निन्दित काम ।
मधुमुख पर उससे बुरा पीछे निन्दाधाम ॥२॥

मृषा, अधम जीवन बुरा, उससे मरना श्रेष्ठ ।
कारण ऐसी मृत्यु से, बिगड़ें कार्य न श्रेष्ठ ॥३॥

मुख पर ही गाली तुम्हें, दीहो बिना विचार ।
तो भी उसकी पीठ पर, बनो न निन्दाकार ॥४॥

मुख से कितनी ही भली, यद्यपि बोले बात ।
पर जिह्वा से चुगल का, नीचहृदय खुल जात ॥५॥

निन्दाकारी अन्य के, होगे तो स्वयमेव ।
खोज खोज चिल्लायँगे, वे भी तेरे ऐब ॥६॥

मैत्रीरस–अनभिज्ञ जो, उक्तिमाधुरीहीन ।
वह ही बोकर फूट को, करता तेरह–तीन ॥७॥

खुल कर करते मित्र की, जो अकीर्ति का गान ।
वे कब छोड़ें शत्रु का, अपयश का व्याख्यान ॥८॥

धैर्य सहित उर में सहे, निन्दक पादप्रहार ।
धर्म ओर फिर फिर तके, भू, उतारवे भार ॥९॥

अन्य मनुज के दोष सम, जो देखे निज दोष ।
उस समान कोई नहीं, भू-भर में निर्दोष ॥१०॥

परिच्छेद १९

चुगली से घृणा

१—जो मनुष्य सदा अन्याय करता है और न्याय का कभी नाम भी नहीं लेता, उसको भी प्रसन्नता होती है, जब कोई कहता है—देखो, यह आदमी किसी की चुगली नहीं खाता।

२—सत्कर्म से विमुख हो जाना और कुकर्म करना निस्सन्देह बुरा है, पर मुख पर हँस कर बोलना और पीठ पीछे निन्दा करना उससे भी बुरा है।

३—झूठ और चुगली के द्वारा जीवन व्यतीत करने से तो तत्काल ही मर जाना अच्छा है, क्योंकि इस प्रकार मर जाने से शुभकर्म का फल मिलेगा।

४—पीठ पीछे किसी की निन्दा न करो, चाहे उसने तुम्हारे मुख पर ही तुम्हें गाली दी हो।

५—मुख से चाहे कोई कितनी ही धर्म कर्म की बातें करे पर उसकी चुगलखोर जिह्वा उसके हृदय की नीचता को प्रगट कर ही देती है।

६—यदि तुम दूसरे की चुगली करोगे तो वह तुम्हारे दोषों को खोज कर उनमें से बुरे से बुरे दोषों को प्रगट कर देगा।

७—जो मधुर बचन बोलना और मित्रता करना नहीं जानते वे चुगली करके फूट का बीज बोते हैं और मित्रों को एक दूसरे से जुदा कर देते हैं।

८—जो लोग अपने मित्रों के दोषों को स्पष्ट रूप से सबके सामने कहते हैं, वे अपने वैरियों के दोषों को भला कैसे छोड़ेंगे?

९—पृथ्वी अपनी छाती पर निन्दा करने वाले के पदाघात को धैर्य के साथ किस प्रकार सहन करती है! क्या चुगलखोर के भार से अपना पिण्ड छुड़ाने के लिए ही धर्म की ओर बार बार ताकती है?

१०—यदि मनुष्य अपने दो[illegible] ना उसी प्रकार करे जिस प्रकार कि वह अपने [illegible] की करता है, तो क्या उसे कभी कोई दोष स्पर्श [illegible]

परिच्छेद २०

व्यर्थ-भाषण

अर्थशून्य जिसके वचन, सुन उपजे उद्वेग ।
उस नर के सम्पर्क से, बचते सभी सवेग ॥१॥

मित्रों को भी क्लेश दे, उससे अधिक निकृष्ट ।
गोष्ठी में जो व्यर्थ का, भाषण देता धृष्ट ॥२॥

दम्भभरा निस्सार जो, भाषण दे निश्शंक ।
घोषित करे अयोग्यता, मानो प्रज्ञारंक ॥३॥

कर प्रलाप बुधवृन्द में, लाभ न कुछ भी हाथ ।
जो भी अच्छा अंश है, खोता वह भी साथ ॥४॥

बकवादी यदि योग्य हो, तो भी दिखे अयोग्य ।
गौरव से वह रिक्त हो, मान न पाता योग्य ॥५॥

रुचि जिसकी बकवाद में, मानव उसे न मान ।
आवश्यक ही कार्य लें, कचरा सम धीमान ॥६॥

उचित जचे तो बोल ले, चाहे कर्कश बात ।
वृथालाप से तो वही, दिखती उत्तम तात ॥७॥

तत्त्वज्ञान विचार में, जिनका मन संलग्न ।
वे ऋषिवर होते नहीं, क्षणभर विकथा-मग्न ॥८॥

जिनकी दृष्टि विशाल वे, प्राज्ञोत्तम गुणधाम ।
कभी न करते भूलकर, बकवादी के काम ॥९॥

भाषण के जो योग्य हो, वह ही बोलो बात ।
और न उसके योग्य जो, तज दीजे वह भ्रात ॥१०॥

परिच्छेद ३०

व्यर्थ-भाषण

१—निरर्थक शब्दों से जो अपने श्रोताओं में उद्वेग लाता है वह सब के तिरस्कार का पात्र है।

२—अपने मित्रों को दुःख देने की अपेक्षा भी अनेक लोगों के आगे व्यर्थ की बकवाद करना बहुत बुरा है।

३—जो निरर्थक शब्दों का आडम्बर फैलाता है वह अपनी अयोग्यता को ऊँचे स्वर से घोषित करता है।

४—सभा में जो व्यर्थ की बकवाद करता है, उस मनुष्य को देखो, उसे और कुछ तो लाभ होने का नहीं, पर जो कुछ उसके पास अच्छी बातें होंगी वे भी छोड़कर चली जावेंगी।

५—यदि व्यर्थ की बकवाद अच्छे लोग भी करने लगें तो वे भी अपने मान और आदर को खो बैठेंगे।

६—जिसे निरर्थक बातों के करने की अभिरुचि है उसे मनुष्य ही न मानना चाहिए, कदाचित् उससे भी कोई काम आ पड़े तो समझदार आदमी उससे कचरे के समान ही काम ले ले।

७—यदि समझदार को योग्य मालूम पड़े तो मुख से कठोर शब्द कहले, क्योंकि यह निरर्थक भाषण से कहीं अच्छा है।

८—जिनके विचार बड़े बड़े प्रश्नों को हल करने में लगे रहते हैं ऐसे लोग विकथा के शब्द अपने मुख से निकालते ही नहीं।

९—जिनकी दृष्टि विस्तृत है वे भूल कर भी निरर्थक शब्दों का उच्चारण नहीं करते।

१०—मुख से निकालने योग्य शब्दों का ही तू उच्चारण कर, परन्तु निरर्थक अर्थात् निष्फल शब्द मुख से मत निकाल।

परिच्छेद २२

परोपकार

बदले की आशा बिना, सन्त करें उपकार ।
बादल का बदला भला, क्या देता संसार ॥१॥

बहुयत्नों से आर्य जो, करते अर्जित अर्थ ।
वह सब होता अन्त में, परहित के ही अर्थ ॥२॥

हार्दिकता से पूर्ण जो, होता है उपकार ।
भू में या फिर स्वर्ग में, उस सम वस्तु न सार ॥३॥

योग्यायोग्य विचार ही, नर का जीवित रूप ।
होता है विपरीत पर, मृतकों सा विद्रूप ॥४॥

पूर्ण लबालब जो भरा, ग्राम-सरोवर पास ।
उस सम शोभा भव्य की, जिसमें प्रेमनिवास ॥५॥

ग्रामवृक्ष के फूल-फल, भोगें जैसे लोग ।
उन्नत-मन के द्रव्य का, वैसा ही उपभोग ॥६॥

उस तरु के ही तुल्य है, उत्तम नर की द्रव्य ।
औषधि जिसके अंग हैं, सदा हरा वह भव्य ॥७॥

दुःखस्थिति में भी सुधी, रखता योग्य विचार ।
पर, वत्सल तजता नहीं, करना पर-उपकार ॥८॥

उपकारी निजको तभी, माने धन से हीन ।
याचक जब ही लौटते, होकर आशाहीन ॥९॥

होवे यद्यपि नाश ही, पर उत्तम उपकार ।
बिककर बन परतंत्र तू, फिर भी कर उपकार ॥१०॥

परिच्छेद २२

परोपकार

१—महान् पुरुष जो उपकार करते हैं उसका बदला नहीं चाहते। भला संसार जल बरसाने वाले बादलों का बदला किस भाँति चुका सकता है ?

२—योग्य पुरुष अपने हाथों से परिश्रम करके जो धन जमा करते हैं, वह सब जीवमात्र के उपकार के लिए ही होता है।

३—हार्दिक उपकार से बढ़कर न तो कोई चीज इस भूतल में मिल सकती है और न स्वर्ग में।

४—जिसे उचित अनुचित का विचार है, वही वास्तव में जीवित है और जिसे योग्य अयोग्य का ज्ञान नहीं हुआ उसकी गणना मृतकों में की जायगी।

५—लबालब भरे हुए गाँव के तालाब को देखो, जो मनुष्य सृष्टि से प्रेम करता है उसकी सम्पत्ति उसी तालाब के समान है।

६—सहृदय व्यक्ति का वैभव गाँव के बीचों बीच उगे हुए और फलों से लदे हुए वृक्ष के समान है।

७—परोपकारी के हाथ का धन उस वृक्ष के समान है जो औषधियों का सामान देता है और सदा हरा बना रहता है।

८—देखो, जिन लोगों को उचित और योग्य बातों का ज्ञान है, वे बुरे दिन आने पर भी दूसरों का उपकार करने से नहीं चूकते।

९—परोकारी पुरुष उसी समय अपने को गरीब समझता है जबकि वह सहायता मांगने वालों की इच्छा पूर्ण करने मे असमर्थ होता है।

१०—यदि परोपकार करने के फलस्वरूप सर्वनाश उपस्थित हो, तो दासत्व मे फँसने के लिए आत्म-विक्रय करके भी उसको सम्पादन करना उचित है।

परिच्छेद २४

कीर्ति

दीनजनों को दान दे, करो कीर्तिविस्तार ।
कारण उज्ज्वलकीर्ति सम, अन्य न कुछ भी सार ॥१॥
जो दयालु करते सदा, दीनजनों को दान ।
सदा प्रशंसक-कण्ठ में, उनका नाम महान ॥२॥
जो पदार्थ इस विश्व में, निश्चित उनका नाश ।
अतुलकीर्ति ही एक है, जिसका नहीं विनाश ॥३॥
स्थायी यश जिसका अहो, छाया सर्वदिगन्त ।
माने उसको देव भी, ऋषि से अधिक महन्त ॥४॥
जिनसे बढ़ती कीर्ति है, ऐसे मृत्यु-विनाश ।
वीरों के ही मार्ग में, आते दोनों खाश ॥५॥
जो लेते नरजन्म तो, करो यशस्वी कर्म ।
यदि ऐसा करते नहीं, मत धारो नर-चर्म ॥६॥
निन्दकजन पर अज्ञ यह, करता है बहुरोष ।
पर निजपर करता नही, रखकर भी बहुदोष ॥७॥
उन सबकी इस लोक में, नहीं प्रतिष्ठा तात ।
जिनकी स्मृति कुछ भी नहीं, कीर्तिमयी विख्यात ॥८॥
भ्रष्टकीर्तिनर-भार से, जब जब दबता देश ।
पूर्वऋद्धि के साथ में, तब तब उजड़े देश ॥९॥
वह ही जीवित लोक में, जिसको नहीं कलंक ।
मृतकों में नर है वही, यश जिसका सकलंक ॥१०॥

परिच्छेद २४

कीर्ति

१—गरीबों को दान दो और कीर्ति कमाओ, मनुष्य के लिए इससे बढ़कर लाभ और किसी में नहीं है।

२—प्रशंसा करने वालों के मुख पर सदा उन लोगों का नाम रहता है कि जो गरीबों को दान देते हैं।

३—जगत् में और सब वस्तुएँ नश्वर हैं, परन्तु एक अतुलकीर्ति ही मनुष्य की नश्वर नहीं है।

४—देखो, जिस मनुष्य ने दिगन्तव्यापी स्थायी कीर्ति पायी है, स्वर्ग में देवता लोग उसे साधु-सन्तों से भी बढ़कर मानते हैं।

५—वह विनाश जिससे कीर्ति में वृद्धि हो और वह मृत्यु जिससे लोकोत्तर यश की प्राप्ति हो, ये दोनों बातें महान् आत्म-बलशाली पुरुषों के मार्ग में ही आती हैं।

६—यदि मनुष्य को जगत् में पैदा ही होना है तो उसको चाहिए कि वह सुयश उपार्जन करे। जो ऐसा नहीं करता उसके लिए तो यही अच्छा था कि वह जन्म ही न लेता।

७—जो लोग दोषों से सर्वथा रहित नहीं हैं वे स्वयं निज पर तो नहीं बिगड़ते, फिर वे अपनी निन्दा करने वालों पर क्यों क्रुद्ध होते हैं?

८—निस्सन्देह यह मनुष्यों के लिए बड़ी ही लज्जा की बात है कि वे उस चिरस्मृति का सम्पादन नहीं करते जिसे लोग कीर्ति कहते हैं।

९—बदनाम लोगों के बोझ से दबे हुए देश को देखो, उसकी समृद्धि भूतकाल में चाहे कितनी ही बढ़ी चढ़ी क्यों न रही हो, धीरे धीरे नष्ट हो जायगी।

१०—वही लोग जीते हैं जो निष्कलङ्क जीवन व्यतीत करते हैं और जिन का जीवन कीर्तिविहीन है, वास्तव में वे ही मुर्दे हैं।

परिच्छेद २५

दया

बड़े पुरुष करुणामयी, मन से ही श्रीमान ।
लौकिक धन से क्षुद्र भी, होते हैं धनवान ॥१॥
सोच समझ क्रमवार ही, करो दया के कर्म ।
मुक्तिमार्ग उसको सभी, कहें जगत के धर्म ॥२॥
सूर्य विना जिस लोक में, छाया तम ही प्राज्य ।
वहाँ न लेते जन्म वे, जिनमें करुणाराज्य ॥३॥
जिन पापों के नाम से, काँप उठे यह जीव ।
वह उनको भोगे नहीं, जिसमें दया अतीव ॥४॥
दयाधनी पाता नहीं, क्लेशभरा सन्ताप ।
साक्षी इसमें है मही, मारुतवेष्ठित आप ॥५॥
दयाधर्म जिसने तजा, होता उस पर शोक ।
चख कर भी फल पाप के, भूल गया अघशोक ॥६॥
जैसे वैभवहीन को, नहीं सुखद यह लोक ।
दयाशून्य नर को नहीं, वैसे ही परलोक ॥७॥
ऐहिक धन से क्षीण फिर, हो सकता धनवान ।
शुभ-दिन पर उसको नहीं, जिसमें करुणा म्लान ॥८॥
सत्य सुलभ उसको नहीं, जिसमें मोहविकार ।
सहज न वैसे क्रूर को, करुणा का अधिकार ॥९॥
दुर्बल की जैसी दशा, करता है तू क्रूर !
वैसी हो तेरी दशा, तब कैसा हो शूर ॥१०॥

परिच्छेद २५

दया

१—दया से लवालव भरा हुआ हृदय ही संसार में सबसे बड़ी सम्पत्ति है क्योंकि भौतिक विभूति तो नीच मनुष्यों के पास भी देखी जाती है।

२—ठीक पद्धति से सोच विचार कर हृदय में दया धारण करो और यदि तुम सब धर्मों से इस बारे में पूछकर देखोगे तो तुम्हें मालूम होगा कि दया ही एकमात्र मुक्ति का साधन है।

३ - जिन लोगों का हृदय दया से ओत प्रोत है वे अंधकारपूर्ण नरक में प्रवेश न करेंगे।

४—जो मनुष्य सब जीवों पर कृपा तथा दया दिखलाता है उसे उन पापपरिणामों को नहीं भोगना पड़ता जिन्हें देखकर ही आत्मा कॉप उठती है।

५—क्लेश दयालु पुरुषों के लिए नहीं है, वातवलय-वेष्टित पृथ्वी इस बात की साक्षी है।

६—खेद है उस आदमी पर जिसने दयाधर्म को त्याग दिया है और पाप के फल को भोग कर भी उसे भूल गया है।

७—जिस प्रकार यह लोक धनहीन के लिए नहीं, उसी प्रकार परलोक निर्दयी मनुष्य के लिए नहीं है।

८—ऐहिक वैभव से शून्य, गरीब लोग तो किसी दिन समृद्धिशाली हो सकते हैं, परन्तु जो लोग दया और ममता से रहित हैं सचमुच ही वे कङ्गाल हैं और उनके सुदिन कभी नहीं फिरते।

९—विकार ग्रस्त मनुष्य के लिए सत्य को पा लेना जितना सहज है, कठोर हृदय वाले पुरुष के लिए नीति के काम करना भी उतना ही आसान है।

१०—जब तुम किसी दुर्वल को सताने के लिए उद्यत हो तो सोचो कि अपने से वलवान मनुष्य के आगे भय से जब तुम कॉपोगे तब तुम्हें कैसा लगेगा?

परिच्छेद २६

निरामिष-जीवन

